中國佛教學院叢書之四

# 佛教梵文讀本

第二冊

王子農編

本地分中菩薩地初持瑜伽處真實義品

117567

(1) धर्माणामारभ्य या ck.

तत्त्वार्थः कतमः। समासतो द्विविधः। यथावद्भाविकतां[1] चारभ्य या धर्माणां भूतता

དེ་ཁོ་ནའི་དོན་གང་ཞེ་ན། མདོར་བསྡུ་ན་རྣམ་པ་གཉིས་ཏེ། ཇི་ལྟར་ཡོད་པ་པ་ལས་བརྩམས་ཏེ། ཆོས་རྣམས་ཀྱི་ཡང་དག་པ་ཉིད་གང་ཡིན་པ་དང་།

云何真實義 謂略有二種 一者依如所有性諸法真實性。

यावद्भाविकतां चारभ्य या धर्माणां सर्वता। इति भूतता सर्वता च धर्माणां समसतः

ཇི་སྙེད་ཡོད་པ་ལས་བརྩམས་ཏེ་ཆོས་རྣམས་ཀྱི་ཐམས་ཅད་ཉིད་གང་ཡིན་པ་སྟེ། དེ་ལྟར་ཡང་དག་པ་ཉིད་དང་། ཐམས་ཅད་ཉིད་ནི་ཆོས་རྣམས་ཀྱི་དེ་ཁོ་ནའི་དོན

二者依盡所有性諸法一切性 如是諸法真實性一切性應知

तत्वार्थो वेदितव्यः। स पुनरेव तत्वार्थः प्रकारप्रभेदतश्चतुर्विधः। लोकप्रसिद्धो युक्ति-

མཐའ་དག་ཡིན་པར་རིག་པར་བྱའོ།། དེ་ཁོ་ནའི་དོན་དེ་ཡང་རབ་ཏུ་དབྱེ་ན་རྣམ་པ་བཞི་སྟེ། འཇིག་རྟེན་གྱི་གྲགས་པ་དང་། རིགས་པས་གྲགས་

總名真實義 此真實義品類差別復有四種 一者世間極成真實二者

प्रसिद्धः क्लेशावरणविशुद्धिज्ञानगोचरः ज्ञेयावरणविशुद्धिज्ञानगोचरश्च ॥

པ་དང་། ཉོན་མོངས་པའི་སྒྲིབ་པ་རྣམ་པར་དག་པའི་ཤེས་པའི་སྤྱོད་ཡུལ་དང་། ཤེས་བྱའི་སྒྲིབ་པ་རྣམ་པར་དག་པའི་ཤེས་པའི་སྤྱོད་ཡུལ་ལོ།

道理極成真實三者煩惱障淨智所行真實 四者所知障淨智所行真實

(1) °वनाग ck འདྲིས་པའི་རྗེས་སུ་འགྲོ་བས (2) °व्यैवेयं

तत्र लौकिकानां सर्वेषां यस्मिं वस्तुनि संकेतसंवृतिसंस्तवनानुगम[1]प्रविष्टया बुद्ध्या

དེ་ལ་བརྡ་དང་། ཀུན་རྫོབ་ལ་འདྲིས་པའི་རྗེས་སུ་འགྲོ་བས་ཞུགས་པའི་བློས་དངོས་པོ་གང་ལ་འཇིག་རྟེན་པ་ཐམས་ཅད་ཀྱི་

云何世間極成真實謂一切世間於彼彼事隨順假立世俗串習悟

दर्शनतुल्यता भवति तद्यथा पृथिव्यां पृथिव्येवेयं[2] नाग्निरिति। यथा पृथिव्यामेवमप्स्वा-

ལྟ་བ་མཚུངས་པར་གྱུར་པ་འདི་ལྟ་སྟེ། ས་ལ་འདི་ནི་ས་ཡིན་གྱི་མེ་མ་ཡིན་ནོ་ཞེས་བྱ་བ་དང་། ས་ལ་ཇི་ལྟ་བ་བཞིན་དུ་མེ་དང་།

入覺慧所見同性謂地唯是地非是火等　如地如是水火風

वप्सु वायौ रूपेषु शब्देषु गन्धेषु रसेषु स्प्रष्टव्येषु भोजने पाने याने वस्त्रे अलंकारो-

ཆུ་དང་། རླུང་དང་། གཟུགས་རྣམས་དང་། སྒྲ་རྣམས་དང་། དྲི་རྣམས་དང་། རོ་རྣམས་དང་། རེག་བྱ་རྣམས་དང་། ཟས་དང་། སྐོམ་དང་། བཞོན་པ་དང་། གོས་དང་། རྒྱན་

色聲香味觸　　　　飲食衣乘諸莊嚴具資產

पविचारे भाण्डोपस्करे(1) गन्धमाल्यविलेपने नृत्यगीतवादित्रे आलोके स्त्रीपुरुषपरि-

དུ་ཉ་བ་དང་། སྣོད་སྤྱད་དང་། སྤོས་དང་། མེ་ཏོག་ཕྲེང་དང་། བྱུག་པ་དང་། གར་དང་། གླུ་དང་། རོལ་མོ་དང་། སྣང་བ་དང་། སྐྱེས་པ་དང་། བུད་མེད་ཀྱི་དགའ་

什物塗香華鬘歌舞妓樂種種光明男女承事

(1) °घडेस्क° C.

(1) नेदम् C. (2) नेदम् K.

चर्यायां क्षेत्रापणगृहवस्तुषु सुखदुःखे। दुःखमिदं न[1] सुखं सुखमिदं न[2] दुःखमिति।

མཐུ་སྤྱོད་པ་དག་ཞིང་དང་། ཚོང་ཁང་དང་། ཁྱིམ་གྱི་དངོས་པོ་དང་། བདེ་བ་དང་། སྡུག་བསྔལ་བ་ལ་སོགས་པ་དེ་བཞིན་ཏེ། འདི་ནི་སྡུག་བསྔལ་བ་ཡིན་སྟེ་བདེ་བ་མ་ཡིན་ནོ། །འདི་ནི་བདེ་བ་ཡིན་གྱི་སྡུག་བསྔལ་བ་མ་ཡིན་ནོ་ཞེས་རྟོག་པ་ལྟ་བུ་སྟེ།

田園邸店宅舍等事當知亦爾苦唯是苦非是樂等樂唯是樂非是苦等

समासतः इदमिदं। नेदम्। एवमिदं नान्यथेति निश्चिताधिमुक्तिगोचरो यद्वस्तु सर्वं

མདོར་བསྡུ་ན་འདི་ནི་འདི་ཡིན་གྱི། འདི་མ་ཡིན་ནོ། །འདི་ནི་འདི་ལྟ་བུ་ཡིན་གྱི་གཞན་དུ་མ་ཡིན་ནོ་ཞེས་འཛིན་ཏེ་ངེས་པ་ཐམས་ཅད་ཀྱི་ངེས་པར་མོས་པའི་སྤྱོད

以要言之此即如此非不如此是即如是非不如是決定勝解所行境事

षामेव लौकिकानां। परंपरागतया संज्ञया स्वविकल्पप्रसिद्ध न चिन्तयित्वा तुलयित्वा

ཡུལ་གཅིག་ནས་གཅིག་ཏུ་བརྒྱུད་པའི་མིང་གིས་རང་གི་རྣམ་པར་རྟོག་པ་ལས་གྲགས་པ། མ་བསམས་མ་དཔྱད་མ་བརྟགས་

一切世間從其本際展轉傳來想自分別共所成立　不由思惟籌量觀察

उपपरीक्ष्योद्गृहीतम्। इदमुच्यते लोकप्रसिद्धतत्त्वं ॥

ཕར་བཟུང་བའི་དངོས་པོ་གང་ཡིན་པ་དེ་ནི་འཇིག་རྟེན་གྱི་གྲགས་པའི་དེ་ཁོ་ན་ཉིད་ཅེས་བྱའོ།

然後方取　是名世間極成真實

युक्तिप्रसिद्धतत्त्वं कतमत् । सतां युक्तार्थसंपिण्डितानां विचक्षणानां तार्किकानां मीमांस-

རིགས་པས་གྲུབ་པའི་དེ་ཁོ་ན་གང་ཞེ་ན། དམ་པའི་རིགས་པའི་དོན་ལ་མཁས་པ། མཛངས་པ། རྟོག་གེ་པ། དཔྱོད་པ་དང་ལྡན་པ།

云何道理極成真實 謂諸智者有道理義 諸聰叡者諸黠慧者能尋

कानां तर्कपर्यापन्नायां भूमौ स्थितानां स्वयंप्रातिभानिक्यां पार्थग्जनिक्यां मीमांसानु-

རྟོག་གེར་རྟོགས་པའི་ས། རང་གི་སྤོབས་པ་ལས་བྱུང་བ། སོ་སོའི་སྐྱེ་བོ་པ། དཔྱོད་པའི་རྗེས་སུ་དཔྱོད་པ་ལ་གནས་པ་རྣམས་

思者能伺察者住尋伺地者具自辯才者居異生位者隨觀察行者

चरितायां प्रत्यक्षमनुमानमाप्तागमं प्रमाणं निश्रित्य सुविनिश्चितज्ञानगोचरो ज्ञेयं

གྱི་ཤེས་པ་ཤིན་ཏུ་རྣམ་པར་ངེས་པ་དེས་པའི་སྤྱོད་ཡུལ་ཤེས་བྱའི་དངོས་པོ་མངོན་སུམ་དང་། རྗེས་སུ་དཔག་པ་དང་། ཡིད་ཆེས་པའི་ལུང་གི་ཚད་མ་ལ་བརྟེན་

依止現比及至教量極善思擇決定智所行所知事由證成道理所

वस्तूपपत्तिसाधनयुक्तया प्रसाधितं व्यवस्थापितं । इदमुच्यते युक्तिप्रसिद्धं तत्त्वं ॥

ནས། འཐད་པས་བསྒྲུབས་པའི་རིགས་པས་རབ་ཏུ་བསྒྲུབས་ཤིང་རྣམ་པར་གཞག་པ་གང་ཡིན་པ་དེ་ནི་རིགས་པས་གྲུབ་པའི་དེ་ཁོ་ན་ཞེས་བྱའོ། 

建立所施設義　　是名道理極成真實

क्लेशावरणविशुद्धिज्ञानगोचरस्तत्त्वं कतमत् । सर्वश्रावकप्रत्येकबुद्धानामनास्रवेण-

ཉོན་མོངས་པའི་སྒྲིབ་པ་རྣམ་པར་དག་པའི་ཤེས་པའི་སྤྱོད་ཡུལ་གྱི་དེ་ཁོ་ན་གང་ཞེ་ན། ཉན་ཐོས་དང་རང་སངས་རྒྱས་ཐམས་ཅད་ཀྱི་ཟག་པ་མེད་པ་དང་།

云何煩惱障淨智所行真實　謂一切聲聞獨覺若無漏智若

नास्रवावाहकेन चानास्रवपृष्ठलब्धेन च लौकिकेन ज्ञानेन यो गोचरविषयः ।

ཟག་པ་མེད་པ་ཐོབ་པར་བྱེད་པ་དང་། ཟག་པ་མེད་པའི་རྗེས་ལས་ཐོབ་པ་འཇིག་རྟེན་པའི་ཤེས་པས་སྤྱོད་ཡུལ་དུ་གྱུར་བའི་ཡུལ་

能引無漏智若無漏後得世間智所行境界

इदमुच्यते क्लेशावरणविशुद्धिज्ञानगोचरस्तत्त्वं। तेनालंबनेन क्लेशावरणाज्ज्ञान

དེ་ནི་ཉོན་མོངས་པའི་སྒྲིབ་པ་རྣམ་པར་དག་པའི་ཤེས་པའི་སྤྱོད་ཡུལ་གྱི་དེ་ཁོ་ན་ཞེས་བྱ་སྟེ། དེ་ལ་དམིགས་པས་ཉོན་མོངས་པའི་སྒྲིབ་པ་ལས་ཤེས་པ་རྣམ་

是名煩惱障淨智所行真實　　由緣此為境從煩惱障智得

विशुध्यति। अनावरणत्वे चायत्यां संतिष्ठते। तस्मात्क्लेशावरणविशुद्धिज्ञान-

པར་དག་པར་འགྱུར་ཞིང༌། ཕྱིས་སྒྲིབ་པ་མེད་པ་ཉིད་དུ་ཡང་དག་པར་གནས་པར་འགྱུར་ཏེ། དེ་བས་ན་ཉོན་མོངས་པའི་སྒྲིབ་པ་རྣམ་པར་དག་པའི་

清淨　　於當來世無障礙住　　是故說名煩惱障淨智所行

गोचरस्तत्वमित्युच्यते ॥

ཤེས་པའི་སྤྱོད་ཡུལ་གྱི་དེ་ཁོ་ན་ཞེས་བྱའོ།

眞實。

तत्पुनस्तत्त्वं कतमत्। चत्वार्यार्यसत्यानि। दुःखं समुदयो निरोधो मार्गश्च। इत्ये-

དེ་ཁོ་ན་དེ་ཡང་གང་ཞེ་ན། འཕགས་པའི་བདེན་པ་བཞི་སྟེ། སྡུག་བསྔལ་བ་དང་། ཀུན་འབྱུང་བ་དང་། འགོག་པ་དང་། ལམ་མོ། ཞེས་པ་

此複云何 謂四聖諦 一苦聖諦二集聖諦三滅聖諦四道聖諦卽

तानि चत्वार्यार्यसत्यानि प्रविचिन्वतोऽभिसमागच्छतोऽभिसमागतेषु च तज्ज्ञाना-

དེ་ནི་འཕགས་པའི་བདེན་པ་བཞི་པོ་དེ་དག་ལ་རབ་ཏུ་རྣམ་པར་འབྱེད་པ་དང་། མངོན་པར་རྟོགས་པ་དང་། མངོན་པར་རྟོགས་པར་གྱུར་པ་ན

於如是四聖諦義極善思擇證入現觀入現觀已如實智生

मुत्पद्यते। स पुनः सत्याभिसमयः श्रावकप्रत्येकबुद्धानां स्कन्धमात्रमुपलभमानानां

སྐྱེ་བར་འགྱུར་རོ། །བདེན་པ་མངོན་པར་རྟོགས་པ་དེ་ཡང་ཉན་ཐོས་དང་། རང་སངས་རྒྱས་ཕུང་པོ་ཙམ་དུ་དམིགས་པ་ཞིང་།

此諦現觀聲聞獨覺能觀唯有諸蘊可得除諸蘊外

स्कन्धेभ्यश्चान्यमर्थान्तरमात्मानमनुपलभमानानां प्रतीत्यसमुत्पन्नसंस्कारोदय-

ཕུང་པོ་རྣམས་ལས་གུད་ན་དོན་གཞན་དུ་གྱུར་པའི་བདག་མི་དམིགས་པ་རྣམས་སུ་གྱུར་པ་ན། རྟེན་ཅིང་འབྲེལ་བར་འབྱུང་

我不可得 數習緣生諸行生滅相應慧故 數習異蘊補

व्ययप्रतिसंयुक्तया प्रज्ञया स्कन्धविनिर्मुक्तपुद्गलाभावदर्शनाभ्यामुत्पद्यते ॥

བའི་འདུ་བྱེད་སྐྱེ་བ་དང་། འཇིག་པ་དང་ལྡན་པའི་ཤེས་རབ་ཀྱི་ཕུང་པོ་ལས་མ་གཏོགས་པའི་གང་ཟག་མེད་པར་ལྟ་བ་གོམས་པར་གྱུར་པ་ལས་འབྱུང་ངོ་།

特伽羅無性見故發生 如是聖諦現觀

ज्ञेयावरणविशुद्धिज्ञानगोचरस्तत्त्वं कतमत्। ज्ञेये ज्ञानस्य प्रतिघात आवरणमित्यु-

ཤེས་བྱའི་སྒྲིབ་པ་རྣམ་པར་དག་པའི་ཤེས་པའི་སྤྱོད་ཡུལ་གྱི་དེ་ཁོ་ན་གང་ཞེ་ན། ཤེས་བྱ་ལ་ཤེས་པའི་བགེགས་བྱེད་པ་ནི་སྒྲིབ་པ་ཞེས་

云何所知障淨智所行真實　謂於所知能礙智故名所知障

च्यते। तेन ज्ञेयावरणेन विमुक्तस्य ज्ञानस्य गोचरो विषयस्तज्ज्ञेयावरणविशुद्धि-

བྱ་སྟེ། ཤེས་བྱའི་སྒྲིབ་པ་དེ་ལས་རྣམ་པར་གྲོལ་བའི་ཤེས་པའི་སྤྱོད་ཡུལ་གྱི་ཡུལ་གང་ཡིན་པ་དེ་ནི་ཤེས་བྱའི་སྒྲིབ་པ་རྣམ་པར་དག་པའི་

從所知障得解脫智所行境界當知是名所知障淨智

ज्ञानगोचरस्तत्वं वेदितव्यं ॥

ཤེས་པའི་སྤྱོད་ཡུལ་གྱི་དེ་ཁོ་ན་ཡིན་པར་རིག་པར་བྱའོ།

所行真實

तत्पुनः कतमत्। बोधिसत्वानां बुद्धानां च भगवतां धर्मनैरात्म्यप्रवेशाय प्रवि-

དེའང་གང་ཞེ་ན། ཆོས་ཐམས་ཅད་བརྗོད་དུ་མེད་པའི་ངོ་བོ་ཉིད་ལས་བརྩམས་ཏེ། བྱང་ཆུབ་སེམས་དཔའ་རྣམས་དང་། སངས་རྒྱས་

二復云何，謂諸菩薩諸佛世尊入法無我入已善淨於一切

ष्टेन सुविशुद्धेन च सर्वधर्माणां निरभिलाप्यस्वभावतामारभ्य प्रज्ञप्तिवादस्व

བཅོམ་ལྡན་འདས་རྣམས་ཀྱི་ཡེ་ཤེས་ཆོས་བདག་མེད་པ་ལ་འཇུག་པ་དང་། ཞུགས་པར་གྱུར་པ་ཤིན་ཏུ་རྣམ་པར་དག་པ་འདོགས་པའི་ཚིག་གི་ངོ་བོ་

法離言自性假說自性平等平等無分別智所行境

भावनिर्विकल्पेन[1] समेन ज्ञानेन यो गोचरविषयः। सा सौपरमा तथता निरुत्त

ཉིད་རྣམ་པར་མི་རྟོག་པ་དང་། མཚུངས་པས་སྤྱོད་ཡུལ་གྱི་ཡུལ་དུ་གྱུར་པ་གང་ཡིན་པ་དེ་ནི་དེ་བཞིན་ཉིད་མཆོག་བླ་ན་མེད་པ། ཤེས་བྱའི

界 如是境界為最第一

[1] कल्पज्ञायसमेन MS རྣམ་པར་མི་རྟོག་པ།

य। ज्ञेयपर्यन्तगता यस्या संयक् सर्वधर्मप्रविचया निर्वर्तन्ते नाभिवर्तन्ते ॥

མཐར་ཐུག་པ་ཡིན་ལ། དེ་ལས་ཡང་དག་པར་ཆོས་ཐམས་ཅད་སོ་ཏུ་རྣམ་པར་འབྱེད་པ་འགྲུབ་པར་འགྱུར་ཏེ། འདའ་བར་མི་འགྱུར་རོ།

真如無上所知邊際齊此一切正法思擇皆悉退還不能度越

तत्पुनः तत्त्वलक्षणं व्यवस्थानतः अद्वयप्रभावितं वेदितव्यं। द्वयमुच्यते भाव-

དེ་ཁོ་ནའི་མཚན་ཉིད་དེ་ཡང་རྣམ་པར་གཞག་པས་ནི་གཉིས་སུ་མེད་པས་རབ་ཏུ་ཕྱེ་བ་ཡིན་པར་རིག་པར་བྱའོ།། གཉིས་ཞེས་བྱ་བ་ནི་དངོས་

又安立此真實義相當知即是無二所顯　所言二者謂有

श्चाभावश्च ॥

ཡོད་དང་དངོས་པོ་མེད་པའོ།

非有

तत्र भावो यः प्रज्ञप्तिवादस्वभावो व्यवस्थापितः। तथैव च दीर्घकालमभिनिविष्टो

དེ་ལ་དངོས་པོ་ནི་འདོགས་པའི་ཚིག་གི་ངོ་བོ་ཉིད་དུ་རྣམ་པར་གཞག་པ་གང་ཡིན་པ་སྟེ། དེ་ཁོ་ན་བཞིན་དུ་ཡུན་རིང་པོ་ནས་འཇིག་རྟེན་གྱིས་མངོན་པར་

此中有者謂所安立假說自性　卽是世間長時所執著

लोकेन। सर्वविकल्पप्रपंचमूलं लोकस्य। तद्यथा रूपमिति वा वेदना संज्ञा सं-

ཞེན་པར་བྱས་པ་དང་། འཇིག་རྟེན་གྱི་རྣམ་པར་རྟོག་པ་དང་། སྤྲོས་པ་ཐམས་ཅད་ཀྱི་རྩ་བར་འགྱུར་པ་སྟེ། འདི་ལྟ་སྟེ། གཟུགས་ཞེས་བྱ་བའམ། ཚོར་བ་དང་། འདུ་ཤེས་དང་།

是世間一切分別戲論根本 或謂為色受想行識

स्कारा विज्ञानमिति वा। चक्षुरिति वा श्रोत्रं घ्राणं जिह्वा कायो मन इति वा।

འདུ་བྱེད་རྣམས་དང་། རྣམ་པར་ཤེས་པ་ཞེས་བྱ་བའམ། མིག་ཅེས་བྱ་བའམ། རྣ་བ་དང་། སྣ་དང་། ལྕེ་དང་། ལུས་དང་། ཡིད་ཅེས་བྱ་བ་འམ།

或謂為眼耳鼻舌身意

पृथिवीति वा आपस्तेजो वायुरिति वा। रूपमिति वा शब्दो गन्धो रसः स्प्रष्ट-

ས་ཞེས་བྱ་བ་འམ། ཆུ་དང་། མེ་དང་། རླུང་ཞེས་བྱ་བ་འམ། གཟུགས་ཞེས་བྱ་བ་འམ། སྒྲ་དང་། དྲི་དང་། རོ་དང་། རེག་བྱ

或復謂為地水火風　　或謂色聲香味觸法

व्यमिति वा। कुशलमिति वा अकुशलमिति वा अव्याकृतमिति वा। उत्पाद

ཞེས་བྱ་བ་འམ། དགེ་བ་ཞེས་བྱ་བ་འམ། མི་དགེ་བ་ཞེས་བྱ་བ་འམ། ལུང་དུ་མ་བསྟན་པ་ཞེས་བྱ་བ་འམ། སྐྱེ་བ་ཞེས་

或謂為善不善無記　　或謂

इति वा व्यय इति वा। प्रतीत्यसमुत्पन्न इति वा। अतीतमिति वा अनागतमिति

བྱ་བ་འམ། འཇིག་པ་ཞེས་བྱ་བ་འམ། རྟེན་ཅིང་འབྲེལ་བར་འབྱུང་བ་ཞེས་བྱ་བ་འམ། འདས་པ་ཞེས་བྱ་བ་འམ། མ་འོངས་པ་ཞེས་བྱ་བ

生滅 或謂緣生 或謂過去未來現在

वा प्रत्युत्पन्नमिति वा। संस्कृतमिति वा असंस्कृतमिति वा। अयं लोकः परो

འམ། ད་ལྟར་བྱུང་བ་ཞེས་བྱ་བ་འམ། འདུས་བྱས་ཞེས་བྱ་བ་འམ། འདུས་མ་བྱས་ཞེས་བྱ་བ་འམ། འཇིག་རྟེན་འདི་དང་། འཇིག་རྟེན་

或謂有為或謂無為 或謂此世或謂

लोकः। उभौ सूर्यचन्द्रमसौ। यदपि दृष्टश्रुतमतविज्ञातं प्राप्तं पर्येषितं मनसा

ཕ་རོལ་དང་། ཉི་མ་དང་། ཟླ་བ་འདི་ག་ཉིས་དང་། མཐོང་བ་དང་། ཐོས་པ་དང་། བྱེ་བྲག་ཕྱེད་པ་དང་། རྣམ་པར་ཤེས་པ་གང་ཡིན་པ་དང་། ཐོབ་པ་དང་། ཡོངས་སུ

他世 或謂日月 或復謂為所見所聞所覺所知所求所得

अनुवितर्कितमनुविचारितमिति वा। अन्ततो यावन्निर्वाणमिति वा। इत्येव

ཚོལ་བ་དང་། ཡིད་ཀྱིས་རྗེས་སུ་རྟོག་པ་དང་། རྗེས་སུ་དཔྱོད་པ་ཞེས་བྱ་བའམ། ཐ་ན་མྱ་ངན་ལས་འདས་པ་ཞེས་བྱ་བའི་བར་དུ་སྟེ། དེ་ལྟ་བུ་དང་

意隨尋伺 最後乃至或謂涅槃 如是等

(1) *रूढस्वभ° C

भागीय प्रज्ञप्तिवादनिरूढः[1] स्वभावो धर्माणां लोकस्य भाव इत्युच्यते ॥

མཐུན་པ་འདོགས་པའི་ཚིག་གི་གྲགས་པའི་ངོ་བོ་ཉིད་ཀྱི་ཆོས་རྣམས་ནི་འཇིག་རྟེན་གྱི་དངོས་པོ་ཞེས་བྱའོ །

類是諸世間共了諸法假說自性是名為有

तत्राभावो या अस्यैव रूपमिति प्रज्ञप्तिवादस्य यावदन्ततो निर्वाणमिति प्रज्ञ-

དེ་ལ་དངོས་པོ་མེད་པ་ནི་གཟུགས་ཞེས་བྱ་བར་འདོགས་པའི་ཚིག་ནས་ཐ་ན་མྱ་ངན་ལས་འདས་པ་ཞེས་བྱ་བའི་བར་དུ་འདོགས་པའི་ཚིག

言非有者謂即諸色假說自性乃至涅槃假說自性無事無相假

प्तिवादस्य निर्वस्तुकता निर्निमित्तता प्रज्ञप्तिवादाश्रयस्य सर्वेण सर्वं नास्तिकता

དེ་ཉིད་དངོས་པོ་མེད་པ་ཉིད་དང་། མཚན་མ་མེད་པ་ཉིད་དེ་གདགས་པ་བརྟེན་ནས་འདོགས་པའི་ཚིག་འཇུག་པར་འགྱུར་བའི་འདོགས་པའི་

說所依一切都無

असंविद्यमानता यामाश्रित्य प्रज्ञप्तिवादः प्रवर्तते[1]। अयमुच्यते अभावः ॥

ཚིག་གི་རྟེན་ཐམས་ཅད་ཀྱི་ཐམས་ཅད་དུ་མེད་པ་དང་། ཡོད་པ་མ་ཡིན་པ་ཉིད་དེ་ནི་དངོས་པོ་མེད་པ་ཞེས་བྱའོ། །

假立言說依彼轉者皆無所有 是名非有

(1) ॰तैत K

यत्पुनः पूर्वकेण च भावेनानेन चाभावेन तदुभाभ्यां भावाभावाभ्यां विनिर्मुक्तं

དངོས་པོ་སྔ་མ་གང་ཡིན་པ་དེ་དང་། དངོས་པོ་མེད་པ་འདི་གཉིས་ཀྱི་ཡོད་པ་དང་། མེད་པ་ལས་རྣམ་པར་གྲོལ་བའི་ཆོས་ཀྱི་མཚན་

先所說有　　今說非有　有及非有二俱遠離

धर्मलक्षणसंगृहीतं वस्तु । तदद्वयं । यदद्वयं सा मध्यमा प्रतिपदंतद्वयविव-

ཉིད་ཀྱིས་བསྡུས་པའི་དངོས་པོ་དེ་ནི་གཉིས་སུ་མེད་པ་ཡིན་ནོ། །གཉིས་སུ་མེད་པ་གང་ཡིན་པ་དེ་ནི་དབུ་མའི་ལམ་མཐའ་གཉིས་སྤངས་

法相所攝真實性事是名無二由無二故說名中道遠離二邊亦

र्जितं निरुत्तरेत्युच्यते। तस्मिंश्च तत्वे बुद्धानां भगवतां सुविशुद्धं ज्ञानं वेदि-

པ། བླ་ན་མེད་པ་ཞེས་བྱ་སྟེ། དེ་ཁོ་ན་དེ་ལས་སངས་རྒྱས་བཅོམ་ལྡན་འདས་རྣམས་ཀྱི་ཡེ་ཤེས་ནི་ཤིན་ཏུ་རྣམ་པར་དག་པར་རིག

名無上　　　　佛世尊智於此真實已善清淨

तव्यं। बोधिसत्वानां पुनः शिक्षामार्गप्रभावितं तत्र ज्ञानं वेदितव्यं॥

པར་བྱའོ། །དེ་ལ་བྱང་ཆུབ་སེམས་དཔའ་རྣམས་ཀྱི་ཤེས་པ་ནི་སློབ་པའི་ལམ་གྱིས་རབ་ཏུ་ཕྱེ་བ་ཡིན་པར་རིག་པར་བྱས་ཏེ།

諸菩薩智於此真實學道所顯

सा च प्रज्ञा महानुपायो बोधिसत्वस्यानुत्तरायाः सम्यक्संबोधेः प्राप्तये। तत्क-

ཤེས་རབ་དེ་ཡང་བྱང་ཆུབ་སེམས་དཔའི་བླ་ན་མེད་པ་ཡང་དག་པར་རྫོགས་པའི་བྱང་ཆུབ་ཐོབ་པར་བྱ་བའི་ཐབས་ཆེན་པོ་ཡིན་ནོ། །དེ་ཅིའི་

又即此慧是諸菩薩能得無上正等菩提廣大方便　何

स्यहेतोः। तथा हि बोधिसत्वस्तेन शून्यताधिमोक्षेण तासु तासु जातिषु प्रयुज्य-

ཕྱིར་ཞེ་ན། འདི་ལྟར་བྱང་ཆུབ་སེམས་དཔའ་ནི་སྟོང་པ་ཉིད་ལ་མོས་པ་དེས་ན། སྐྱེ་བ་དེ་དང་དེ་དག་ཏུ་སྦྱོར་བ་ན་སེམས་ཅན་དང་།

以故　以諸菩薩家於生死彼彼生中修空勝解善能

मानः सत्वस्वबुद्धधर्मपरिपाकाय संसारे संसरन्तं च संसारं यथाभूतं प्रजानाति।

རང་གིས་སངས་རྒྱས་ཀྱི་ཆོས་རྣམས་ཡོངས་སུ་སྨིན་པར་བྱ་བའི་ཕྱིར་འཁོར་བ་ན་འཁོར་ཏེ། འཁོར་བ་དེ་ཡང་དག་པ་ཇི་ལྟ་བ་བཞིན་དུ་རབ་ཏུ་ཤེས་ལ།

成熟一切佛法及諸有情 — 又能如實了知生死

न च पुनस्तस्मात्संसारादनित्यादिभिराकारैर्मानसमुद्वेजयते। सचेत्संसारं यथा-

འཁོར་བ་དེ་ལས་ཀྱང་མི་རྟག་པ་ལ་སོགས་པའི་རྣམ་པ་དག་གིས་ཡིད་སྐྱོ་བར་མི་བྱེད་དོ། །གལ་ཏེ་འཁོར་བ་ལ་ཡང་དག་པ་ཇི་ལྟ་བ་བཞིན་དུ

不於生死以無常等行深心厭離 若諸菩薩不

(1) "由襍染心受生死故"一語,漢藏兩譯均有之,梵本闕之

भूतं न परिजानीयान्न शक्नुयाद्रागद्वेषमोहादिकात्सर्वसंक्लेशाच्चित्तमध्युपेक्षितुं ।

ཡོངས་སུ་མི་ཤེས་ན་ནི། འདོད་ཆགས་དང་། ཞེ་སྡང་དང་། གཏི་མུག་ལ་སོགས་པ་ཀུན་ནས་ཉོན་མོངས་པ་ཐམས་ཅད་ལ་སེམས་ལྷག་པར་བཏང་སྙོམས་སུ་འཇོག་པར་མི་ནུས་སོ།

能如實了知生死則不能於貪瞋癡等一切煩惱深心棄捨

श्चानध्युपेक्षमानश्च संक्लिष्टचित्तः संसारे संसरं(1) नैव बुद्धधर्मान्परिपाचयेन्नापि

ལྷག་པར་བཏང་སྙོམས་སུ་མ་བཏུབ་ན་ནི། སེམས་ཀུན་ནས་ཉོན་མོངས་པ་ཅན་དུ་གྱུར་ལ། འཁོར་བ་ན་འཁོར་བར་འགྱུར་རོ།། ཀུན་ནས་ཉོན་མོངས་པ་ཅན་གྱི་སེམས་ཀྱིས་འཁོར་བ་ན་ནི། སངས་རྒྱས་ཀྱི་

不能棄捨諸煩惱故便襍染心受諸生死由襍染心受生死故不能成熟一

सत्वान्। सचेत्पुनरनित्यादिभिराकारैः संसारान्मानसमुद्वेजयेदेवं सति बोधि-

ཆོས་རྣམས་དང་། སེམས་ཅན་རྣམས་ཡོངས་སུ་སྨིན་པར་བྱེད་པར་མི་ནུས་སོ།། གལ་ཏེ་མི་རྟག་པ་ལ་སོགས་པའི་རྣམ་པ་དག་གིས་འཁོར་བ་ལས་སེམས་སྐྱོ་བར་གྱུར་ན། དེ་ལྟ་ན་ནི་བྱང་ཆུབ་

切佛法及諸有情。若諸菩薩於其生死以無常等行深心厭離是則速

सत्वो लघुलघ्वेव परिनिर्वायात्। लघुलघ्वेव परिनिर्वायं बोधिसत्व एवमपि

སེམས་དཔའ་མྱུར་བ་མྱུར་བར་ཡོངས་སུ་མྱ་ངན་ལས་འདའ་བར་འགྱུར་རོ། བྱང་ཆུབ་སེམས་དཔའ་མྱུར་བ་མྱུར་བར་ཡོངས་སུ་མྱ་ངན་ལས་འདས་ན། དེ་ལྟ་ན་ཡང་སངས་རྒྱས་ཀྱི་

疾入般涅槃　　彼若速疾入般涅槃尚不能成熟

नैव बुद्धधर्मान्नैव सत्वान्परिपाचयेत्। कुतः पुनरनुत्तरां सम्यक्संबोधिमभिसं-

ཆོས་རྣམས་དང་། སེམས་ཅན་རྣམས་ཀྱང་ཡོངས་སུ་སྨིན་པར་བྱེད་མི་ནུས་ན། བླ་ན་མེད་པ་ཡང་དག་པར་རྫོགས་པའི་བྱང་ཆུབ་མངོན་པར་རྫོགས་པར་འཚང་རྒྱ་བར་

一切佛法及諸有情　　　況能證無上正等菩提

भोत्स्यते। तेनैव च शून्यताधिमोक्षेन बोधिसत्वः प्रयुज्यमानः न निर्वाणादु-

ལྷག་པ་ལ་འགྱུར། །བྱང་ཆུབ་སེམས་དཔའ་སྟོང་པ་ཉིད་དུ་མོས་པ་དེས་སྦྱོར་བ་ན། མྱ་ངན་ལས་འདས་པ་ལས་སྐྲག་པར་ཡང་མི

又諸菩薩由習如是空勝解故　　　則於涅槃不

त्रस्यति नापि च निर्वाणं प्रार्थयते। सचेद्बोधिसत्वो निर्वाणादुत्त्रस्येत्परत्र नि-

འགྱུར་ལ། མྱ་ངན་ལས་འདས་པ་དོན་དུ་གཉེར་བར་ཡང་མི་བྱེད་དོ། །གལ་ཏེ་བྱང་ཆུབ་སེམས་དཔའ་མྱ་ངན་ལས་འདས་པས་སྐྲག་པར་གྱུར་ན་ནི། །འདི་

深怖畏亦於涅槃不多願樂　若諸菩薩深怖涅槃卽使於彼涅槃

र्वाणसंभारोऽस्य न पूर्येत यथापि तदुत्त्रस्तमानसत्वान्निर्वाणे अननुशंसदर्शिनस्

ལྟར་ཡིད་སྐྲག་པས་མྱ་ངན་ལས་འདས་པའི་ཕན་ཡོན་མི་མཐོང་བ་དང་། དེ་ལ་ཡོད་པའི་ཡོན་ཏན་མཐོང་བའི་དད་པ་དང་། མོས་པ་སྤྱངས་པའི་ཕྱིར

資糧不能圓滿　由於涅槃深怖畏故不見涅槃勝利功德

नज्ञतगुणदर्शनप्रसादाधिमुक्तिविवर्जितस्य बोधिसत्वस्य। सचेत्पुनर्बोधिसत्वो।

ཆུབ་སེམས་དཔའ་དེ་ཡོང་དུ་མྱ་ངན་ལས་འདས་པའི་ཚོགས་ཡོངས་སུ་རྫོགས་པར་མི་འགྱུར་རོ། གལ་ཏེ་བྱང་ཆུབ་སེམས་དཔའ་མྱ་ངན་ལས་འདས་པ

由不見故便於涅槃遠離一切清淨勝解　　若諸菩薩於其

निर्वाणे प्रार्थनाबहुलविहारी भवेदाश्वेव परिनिर्वायात्। आशुपरिनिर्वाणन्नैव

དོན་དུ་གཉེར་བ་ལས་ཞེས་ཆེར་གནས་པར་གྱུར་ན་ནི། །མྱུར་བ་ཉིད་དུ་ཡོངས་སུ་མྱ་ངན་ལས་འདའ་བར་འགྱུར་རོ། །མྱུར་དུ་ཡོངས་སུ་མྱ་ངན་ལས་འདས་ནས་ཀྱང་

涅槃多住願樂是則速疾入般涅槃　　彼若速疾入般涅

बुद्धधर्मान्न सत्वान्परिपाचयेत् । तत्र या च समारं यथाभूतमपरिजानतः सं-

རྒྱས་ཀྱི་ཆོས་རྣམས་དང་། སེམས་ཅན་རྣམས་ཡོངས་སུ་སྨིན་པར་བྱེད་པར་མི་འགྱུར་རོ།། དེ་ལ་འཁོར་བ་ཡང་དག་པ་ཇི་ལྟ་བ་བཞིན་དུ་ཡོངས་སུ་མ་ཤེས་ཏེ། ཀུན་ནས་ཉོན་"

槃則便不能成熟佛法及諸有情 當知此中若不如實了知生死卽雜

क्लिष्टचित्तस्य संसारसंसृतिः । या च संसारादुद्विग्नमानसस्याशुनिर्वृतिः । या

མོངས་པ་ཅན་གྱི་སེམས་ཀྱིས་འཁོར་བ་ན་འཁོར་བ་གང་ཡིན་པ་དང་། འཁོར་བ་ལ་ཡིད་ཀྱིས་སྐྱོ། མྱུར་དུ་མྱ་ངན་ལས་འདའ་བ་གང་ཡིན་པ་དང་། མྱ་ངན་"

染心流轉生死 若於生死深心厭離卽便速疾入般涅

॥ ·पूर्यो

च निर्वाणादुत्त्रस्तमानसस्य तत्संभारापरिपूरि या″ च निर्वाणप्रार्थनाबहुलवि

ལས་འདས་པས་ཡིད་སྐྲག་སྟེ། དེའི་ཚོགས་ཡོངས་སུ་རྫོགས་པར་མི་འགྱུར་བ་གང་ཡིན་པ་དང་། མྱ་ངན་ལས་འདས་པ་དོན་དུ་གཉེར་བ་ལ་ཤས་ཆེར་གནས་ཏེ།

於涅槃深心怖畏即於能證涅槃資糧不能圓滿 若於涅槃多住願樂即使

हारिणः आशुपरिनिर्वृतिः। अयमनुपायो बोधिसत्त्वस्य वेदितव्यो ऽनुत्तरायाः

མྱུར་དུ་ཡོངས་སུ་མྱ་ངན་ལས་འདའ་བ་གང་ཡིན་པ་དེ་ནི་བྱང་ཆུབ་སེམས་དཔའི་བླ་ན་མེད་པ་ཡང་དག་པར་རྫོགས་པའི་བྱང་ཆུབ་ཐོབ་པར་བྱ་བ་ལ་ཐབས་མི་

速疾入般涅槃 是諸菩薩於證無上正等菩提無大方

सम्यक्संबोधेः। या पुनः संसारं यथाभूतं परिजानतोऽसंक्लिष्टचित्तस्य संसार-

མཁས་པ་ཡིན་པར་རིག་པར་བྱའོ། །འཁོར་བ་ཡང་དག་པ་ཇི་ལྟ་བ་བཞིན་དུ་ཡོངས་སུ་ཤེས་ཏེ། །ཀུན་ནས་ཉོན་མོངས་པ་ཅན་མ་ཡིན་པའི་སེམས་ཀྱིས་འཁོར་བ་ན་འཁོར་བ

使　　若能如實了知生死即無染心流轉生死

संसृतिः। या च संसारादनित्यादिभिराकारैः अनुद्विग्नमानसस्यानाशुनिर्वृतिः।

གང་ཡིན་པ་དང་། འཁོར་བ་ལ་མི་རྟག་པ་ལ་སོགས་པའི་རྣམ་པ་དག་གིས་ཡིད་མི་སྐྱོ་སྟེ། །མྱུར་དུ་ཡོངས་སུ་མྱ་ངན་ལས་མི་འདའ་བ་གང་ཡིན་པ་དང་།

若於生死不以無常等行深心厭離即不速疾入般涅槃

(11) *पूया

या च निर्वाणादनुत्त्रस्तमानसस्य तत्संभारपरिपूरिः या(11) च निर्वाणे गुणानुशंस-

མྱ་ངན་ལས་འདས་པས་ཡིད་མི་སྐྲག་སྟེ། དེའི་ཚོགས་ཡོངས་སུ་རྫོགས་པར་འགྱུར་བ་གང་ཡིན་པ་དང་། མྱ་ངན་ལས་འདས་པའི་ཡོན་ཏན་དང་། ཕན་ཡོན་

若於涅槃不深怖畏卽能圓滿涅槃資糧　雖於涅槃見有微妙勝

दर्शिनो न चात्यर्थमुत्कण्ठा प्राप्तस्याशुनिर्वृतिः। अयं बोधिसत्त्वस्य महानुपा-

མཐོང་སྟེ། ཧ་ཅང་སྐྱོ་བར་གྱུར་ཅིང་མྱུར་དུ་མྱ་ངན་ལས་འདའ་བ་མ་ཡིན་པ་ དེ་ན་བྱང་ཆུབ་སེམས་དཔའི་བླ་ན་མེད་པ་ཡང་དག་པར་རྫོགས་"

利功德而不深願速證涅槃　　是諸菩薩於證無上正

यो ऽनुत्तरायाः सम्यक्संबोधेरनुप्राप्तये। स चायमुपायस्तस्मिन्परमशून्यता-

པའི་བྱང་ཆུབ་ཐོབ་པར་བྱ་བའི་ཐབས་ཆེན་པོ་ཡིན་ནོ། ། ཐབས་དེ་ཡང་སྟོང་པ་ཉིད་ཀྱི་མཆོག་ལ་མོས་པ་འདི་ལ་རྟེན་

等菩提有大方便　　是大方便依止最勝空性

धिमोक्षे संनिश्रितः। तस्मात्सा परमशून्यताधिमोक्षभावना बोधिसत्वस्य शिक्षा-

པ་ཡིན་ནོ། དེ་བས་ན་སྟོང་པ་ཉིད་ཀྱི་མཆོག་ལ་མོས་པར་སྒོམ་པ། བྱང་ཆུབ་སེམས་དཔའི་སློབ་

勝解　　是故菩薩修習學道所攝最勝空性勝解名

मार्गसंगृहीतो महानुपाय इत्युच्यते यदुत तथागतज्ञानाधिगमाय। स खलु

པའི་ལམ་གྱིས་བསྡུས་པ་ནི་འདི་ལྟ་སྟེ། དེ་བཞིན་གཤེགས་པའི་ཡེ་ཤེས་ཐོབ་པར་བྱ་བའི་ཐབས་ཆེན་པོ་ཞེས་བྱའོ།། བྱང་ཆུབ་སེམས་

為能證如來妙智廣大方便　又諸菩

बोधिसत्त्वस्तेन दूरानुप्रविष्टेन धर्मनैरात्म्यज्ञानेन निरभिलाप्यस्वभावतां सर्व-

དཔའ་དེ་ནི་ཆོས་བདག་མེད་པའི་ཡེ་ཤེས་རིང་དུ་ཞུགས་པ་དེས་ཆོས་ཐམས་ཅད་ཀྱི་བརྗོད་དུ་མེད་པའི་ངོ་བོ་ཉིད་ཡང་དག་པ་ཇི་ལྟ་

薩由能深入法無我智於一切法離言自性如實知已

धर्माणां यथाभूतं विदित्वा न कंचिद्धर्मं कथंचित्कल्पयति नान्यत्र वस्तुमात्रं

པ་བཞིན་དུ་རྟོགས་པས་དངོས་པོ་ཙམ་མམ། དེ་བཞིན་ཉིད་ཙམ་དུ་འཛིན་པ་མ་གཏོགས་པར་ཆོས་གང་ཡང་རྟང་སྟེ། ཇི་ལྟ་བུར

達無少法及少品類可起分別唯取其事

गृह्णाति तथतामात्रं । न चास्यैवम्भवति । वस्तुमात्र तत्तथतामात्रं चेति । अर्थे

ཡང་རྣམ་པར་རྟོག་པར་མི་བྱེད་དོ། །འོན་ཀྱང་འདི་སྙམ་དུ་འདི་ནི་དངོས་པོ་ཙམ་མོ། །འདི་ནི་དེ་བཞིན་ཉིད་ཙམ་མོ་སྙམ་དུ་ཡང་དེ་མི་སེམས་སོ། །བྱང་ཆུབ

唯取真如　不作是念此是唯事是唯真如　但

तु स बोधिसत्त्वश्चरति। अर्थे परमे चरं सर्वधर्मांस्तया तथतया समसमान्यथाभूतं

སེམས་དཔའ་དེ་དོན་དེ་སྤྱོད་པར་བྱེད་དོ། །དོན་གྱི་དམ་པ་ལ་སྤྱོད་ན། ཆོས་ཐམས་ཅད་དེ་བཞིན་ཉིད་དེ་དང་མཚུངས་པར་མཉམ་པར་ཡང་དག་པ་ཇི་ལྟ་

行於義　　如是菩薩行勝義故於一切法平等平等以真如慧

प्रज्ञया पश्यति। सर्वत्र च समदर्शी समचित्त सन्परमां उपेक्षा प्रतिलभते। यामा-

བ་བཞིན་དུ་ཤེས་རབ་ཀྱིས་མཐོང་ངོ་། ཐམས་ཅད་ལ་མཉམ་པར་ལྟ་ཞིང་སེམས་སྙོམས་པས་བཏང་སྙོམས་ཀྱི་མཆོག་ཐོབ་པར་འགྱུར་རོ། །དེ་ལ་

如實觀察　於一切處具平等見具平等心得最勝捨　　依止

श्रित्य सर्वविद्यास्थानकौशलेषु प्रयुज्यमानो बोधिसत्वः सर्वपरिश्रमैः सर्वदुःखो-

བརྟེན་ནས་བྱང་ཆུབ་སེམས་དཔའ་རིག་པའི་གནས་ཐམས་ཅད་ལ་མཁས་པར་སྦྱོར་བ་ལ་སྦྱོར་བ་ན། ཡོངས་སུ་ངལ་བ་ཐམས་ཅད་དང་། སྡུག་བསྔལ་གྱིས་ཐེབས་པ་ཐམས་

此捨於諸明處一切善巧勤修習時雖復遭遇一切劬勞一切苦難

पनिपातैः न निवर्तते। क्षिप्रं चाक्लान्तकायः अक्लान्तचितः तत्कौशलं समुदानयति।

ཅད་ཀྱི་ཕྱིར་ལྡོག་པར་མི་འགྱུར་ལ། ལུས་ངལ་བ་མེད་པ་དང་སེམས་ངལ་བ་མེད་པས་དེ་ལ་མཁས་པ་མྱུར་དུ་ཡང་དག་པར་སྒྲུབ་པར་བྱེད་དེ།

而不退轉　速疾能令身無勞倦心無勞倦於諸善巧速能成辦

महास्मृतिबलाधानप्राप्तश्च भवति। न च तेन कौशलेनोन्नतिं गच्छति। न च परेषा-

དྲན་པའི་སྟོབས་བསྐྱེད་པ་ཆེན་པོ་ཡང་ཐོབ་པར་འགྱུར་རོ། །མཁས་པར་གྱུར་པ་དེས་ཀྱང་ཁེངས་པར་མི་འགྱུར་ལ། གཞན་དག་ལ་ཡང་

得大念力 不因善巧而自貢高 亦於他所

माचार्यमुष्टिं करोति। सर्वकौशलेषु चासंलीनचित्तो भवति। उत्साहवानव्याह-

སློབ་དཔོན་གྱི་དཔེ་མཁྱུད་མ་བྱེད་དོ། །མཁས་པར་བྱ་བ་ཐམས་ཅད་ལ་ཡང་སེམས་ཞུམ་པར་མི་འགྱུར་ཞིང་། སྤྲོ་བ་དང་ལྡན་ཏེ། འཇིགས་པ་ཡང་

無有秘吝 於諸善巧心無怯弱 有所堪能所

तगतिश्च भवति। दृढसंनाहप्रयोगः यथायथा संसारे समरं दुःखविशेषं लभते।

ཐོགས་པ་མེད་པར་འགྱུར་རོ། །གོ་ཆའི་སྦྱོར་བ་ཡང་བརྟན་པར་འགྱུར་ཏེ། ཇི་ལྟ་ཇི་ལྟར་འཁོར་བ་ན་འཁོར་བའི་ཚེ། སྡུག་བསྔལ་བའི་ཁྱད་པར་རྙེད་པ

行無礙　具足堅固鉀鎧加行是諸菩薩於生死中如如流轉遭大苦難

तथातथा उत्साहं वर्धयत्यनुत्तरायां संयक्संबोधौ। यथायथा समुच्छ्रयविशे-

དེ་ལྟ་དེ་ལྟར་བླ་ན་མེད་པ་ཡང་དག་པར་རྫོགས་པའི་བྱང་ཆུབ་ལ་སྤྲོ་བ་སྐྱེ་བར་འགྱུར་རོ། །ཇི་ལྟ་ཇི་ལྟར་ཕུལ་ཀྱི་ཁྱད་པར་ཐོབ་

如是如是於其無上正等菩提堪能增長　如如獲得尊貴殊勝

षमधिगच्छति। तथातथा निर्मानतरो भवति सत्वानामन्तिके। यथायथा ज्ञानवि-

པར་ཐུར་པ་དེ་ལྟ་དེ་ལྟར་སེམས་ཅན་རྣམས་ལ་ཞེན་ཏུ་ང་རྒྱལ་མེད་པར་འགྱུར་རོ། །ཇི་ལྟ་ཇི་ལྟར་ཤེས་པའི་

如是如是於諸有情憍慢漸減　如如證得智

शेषमधिगच्छति। तथातथा भूयस्या मात्रया परोपारभविवादप्रकीर्णलपितात्क्ले-

ཁྱད་པར་ཐོབ་པ་ དེ་ལྟ་དེ་ལྟར་གཞན་ལ་ཀླན་ཀ་ཅོལ་བ་དང་། རྩོད་པ་དང་། སྨྲ་བ་མང་བ་དང་། ཉོན་མོངས་པ་དང་། ཉེ་བའི་ཉོན་མོངས་པ་རྣམས་

慧殊勝　如是如是倍於他所難詰諍訟諠譁語論本咸隨

शोपक्लेशेभ्यश्च वृत्तस्खलितसमुदाचारेभ्यः परिज्ञाय परिज्ञाय चित्तमध्युपेक्षते ।

དང་།ཚུལ་འཁྲུལ་པ་ཀུན་དུ་སྤྱོད་པ་རྣམས་ལ་ཡོངས་སུ་ཤེས་པར་བྱས་ཤིང་ཡོངས་སུ་ཤེས་པར་བྱས་ནས།ཤེས་ཆེར་སེམས་ཀྱིས་ལྷག་པར་བཏང་སྙོམས་སུ་བྱེད་དོ།

戚犯業現行能數觀察深心棄捨

यथायथा गुणैः वर्धते । तथातथा प्रतिच्छन्नकल्याणो भवति । न परतो ज्ञातुं

ཇི་ལྟ་ཇི་ལྟར་ཡོན་ཏན་དག་གིས་སྐྱེ་བ་དེ་ལྟ་དེ་ལྟར་དགེ་བ་མི་སྦྱོམས་པར་འགྱུར་ཞིང་།　　གཞན་ལས་ཤེས་ཀྱི་ཁ

如如功德展轉增上　如是如是轉覆自善　　不求他知

समन्वेषते । न लाभसत्कारम् । इमा एवंभागीया बह्वः अनुशंसा भवन्ति बो-

དང་། རྙེད་པ་དང་། བཀུར་སྟི་མི་ཚོལ་ཏེ། བྱང་ཆུབ་སེམས་དཔའ་ཡེ་ཤེས་དེ་ལ་བརྟེན་པ་ལ་ནི་དེ་ལྟ་བུ་འདི་དག་དང་

亦不希求利養恭敬 如是等類菩薩所有眾多勝利是菩提分

धिसत्वस्य बोधिपक्ष्या बोध्यनुकूलाः तज्ज्ञानसनिश्रितस्य । तस्माद्ये केचिद्बोधि-

མཐུན་པའི་ཕན་ཡོན་མང་པོ་བྱང་ཆུབ་ཀྱི་ཕྱོགས་དང་། བྱང་ཆུབ་དང་མཐུན་པ་དག་འབྱུང་བར་འགྱུར་རོ། །དེ་བས་ན་གང་ལ་ལ་དག

隨順菩提皆依彼智 是故一切已得

मनुप्राप्तवन्त ये केचित्प्राप्स्यन्ति ये च प्राप्नुवन्ति । सर्वे त एतदेव ज्ञान निश्रि-

བྱང་ཆུབ་ཐོབ་པར་གྱུར་པ་དང་། གང་ལ་ལ་དག་ཐོབ་པར་འགྱུར་བ་དང་། གང་དག་ཐོབ་པ་དེ་དག་ཐམས་ཅད་ཀྱི་ཡེ་ཤེས་དེ་ཉིད་ལ་བརྟེན་

得菩提當得今得　　皆依彼智

त्य । नान्यन्न्यूनं प्रतिविशिष्टं वा । एवं निष्प्रपंचनयारूढो बोधिसत्वो एवं च

ནས། དམའ་བ་དང་། ཁྱད་པར་ཅན་གཞན་ལས་མ་ཡིན་ནོ། །བྱང་ཆུབ་སེམས་དཔའ་དེ་ལྟར་སྤྲོས་པ་མེད་པའི་ཚུལ་ལ་ཞུགས་ཤིང་། དེ་ལྟར་ཡང་

除此更無若劣若勝　又諸菩薩乘御如是無戲論理獲得

बह्ननुशसः आत्मनश्च बुद्धधर्मपरिपाकाय परेषां च यानत्रयधर्मपरिपाकाय सयक्

ཡོན་ཏན་མང་པོ་དང་ལྡན་པ་དེ། བདག་ཉིད་ཀྱང་སངས་རྒྱས་ཀྱི་ཆོས་ཡོངས་སུ་སྨིན་པར་བྱ་བ་དང་། གཞན་དག་ཀྱང་ཐེག་པ་གསུམ་གྱི་ཆོས་ཡོངས་སུ་སྨིན་པར་བྱ་བའི་

如是衆多勝利為自成熟諸佛法故為成熟他三乘法故修行

प्रतिपन्नो भवति। एवं च पुनः सम्यक् प्रतिपन्नो भवति। भोगेष्वात्मभावे च निरतृ-

ཕྱིར་ཡང་དག་པར་ཞུགས་པ་ཡིན་ནོ། །འདི་ལྟར་ཡང་དག་པར་ཞུགས་པ་ཡིན་ཏེ། ལོངས་སྤྱོད་རྣམས་དང་། ལུས་ལ་ཡང་

正行　　彼於如是修正行時　　於自身財遠離貪愛

ष्णो भवति। निस्तृष्णतायां च शिक्षते सत्वेषु भोगात्मभावपरित्यागाय सत्वानामेवा-

སྲེད་པ་མེད་ལ། སེམས་ཅན་རྣམས་ལ་ལོངས་སྤྱོད་དང་། ལུས་ལོངས་སྤྱོད་གཏོང་བའི་ཕྱིར་ཡང་སྲེད་པ་མེད་པར་སློབ་བོ། །སེམས་ཅན་རྣམས་ཀྱི་

於諸衆生學離貪愛　能捨身財唯為利益諸衆生故

र्थाय। संवृतश्च भवति सुसंवृतः। कायेन वाचा संवराय च शिक्षते प्रकृत्या पापारु-

དོན་གྱི་ཕྱིར་ལུས་དང་ངག་བསྡམས་ཤིང་། ཤིན་ཏུ་བསྡམས་པ་ཡང་ཡིན་ནོ། རང་བཞིན་གྱིས་སྡིག་པ་ལ་མི་དགའ་བ་དང་། རང་བཞིན་

又能防護極善防護　由身語等脩學律儀　性不樂惡

चितायै प्रकृतिभद्रकल्याणतायै। क्षमो भवति परतः सर्वोपतापविप्रतिपत्तीनां

གྱིས་བཟང་ཞིང་དགེ་བའི་ཕྱིར་སྙོམས་པ་ལ་ཡང་སློབ་པའོ། གཞན་ལ་གནོད་པ་དང་། ལོག་པར་སྒྲུབ་པ་བྱུང་བ་ཐམས་ཅད་ལ་ཡང་བཟོད་

性極賢善　　又能忍他一切侵惱於行惡者能學

क्षमित्वं च शिक्षते। मन्दक्रोधतायै चापरोपतापनतायै च। सर्वविद्यास्थानेषु

པ་ཡིན་ལ། །ཁྲོ་བ་ཆུང་བར་བྱ་བ་དང་། གཞན་ལ་གནོད་པ་མི་བྱ་བའི་ཕྱིར་བརྩོན་པ་ལ་ཡང་སློབ་བོ། །སེམས་ཅན་རྣམས་ཀྱི་ནི་

堪忍　　性薄瞋忿不侵惱他　　又能勤脩一

चाभियुक्तो भवति कुशलो वा। सत्त्वानां विचिकित्साप्रहाणायानुग्रहोपसंहाराय

ཆོས་བསམ་ལ་བ་དང་། ཕན་གདགས་པ་སྒྲུབ་པ་དང་། བདག་ཉིད་ཐམས་ཅད་མཁྱེན་པ་ཉིད་ཀྱི་རྒྱུ་ཡོངས་སུ་གཟུང་བའི་ཕྱིར་རིག

切明處令其善巧　　為斷眾生一切疑難為惠眾生諸饒益

चात्मनश्च सर्वज्ञत्वहेतुपरिग्रहाय। अध्यात्मस्थितचित्तश्च भवति सुसमाहितः।

པའི་གནས་ཐམས་ཅད་ལ་ཡང་བརྩོན་པ་འམ་མཁས་པ་ཡིན་ནོ། །སེམས་ནང་དུ་གནས་ཤིང་སེམས་ཤིན་ཏུ་མཉམ་པར་གཞག་པ་ཡང་ཡིན་ནོ།

事為自攝受一切智因　　又能於內安住其心令心善定

चित्तस्थितये च शिक्षते चतुर्ब्राह्मविहारपरिशोधनतायै पंचाभिज्ञाविक्रीडनतायै च

སེམས་གནས་པར་བྱ་བ་དང་། ཚངས་པའི་གནས་པ་བཞི་ཡོངས་སུ་དག་པར་བྱ་བ་དང་། མངོན་པར་ཤེས་པ་ལྔས་རྣམ་པར་རྩེ་བས་སེམས་ཅན་གྱི་ཞབས

於心安住常勤修學為淨修深四種梵住為能遊戲五種神通為能成

सत्वकृत्यानुष्ठानतायै सर्वकौशल्याभियोगजल्पमविनोदनतायै च । विचक्षणाश्च

སྒྲུབ་པ་དང་། མཁས་པར་བྱ་བ་ཐམས་ཅད་ལ་མངོན་པར་བརྩོན་པ་ལས་བྱུང་བའི་ངལ་བ་བསལ་བའི་ཕྱིར་ཡང་སློབ་བོ། །ཤེས་རབ་ཅན་དེ་བཞིན

立利眾生事為欲除遣精勤修學 切善巧所生勞倦 又性黠慧

भवति परमतत्वज्ञः । परमतत्वज्ञतायै च शिक्षते । महायाने चायत्यामात्मनः

མཆོག་ཤེས་པ་ཡང་ཡིན་ལ། ཕྱི་མ་ལ་བདག་ཉིད་ཐེག་པ་ཆེན་པོས་ཡོངས་སུ་མྱ་ངན་ལས་འདའ་བར་བྱ་བའི་ཕྱིར། དེ་ཁོ་ན་མཆོག་ཤེས་

成極真智　　為極真智常勤修學　　為自當來般涅槃故

परिनिर्वाणाय । स खलु बोधिसत्वः एवं सम्यक् प्रयुक्तो गुणवत्सु सत्वेषु पूजा-

པ་ལ་ཡང་སློབ་པོ། །བྱང་ཆུབ་སེམས་དཔའ་དེ་ལྟར་ཡང་དག་པའི་སྦྱོར་བ་བྱེད་པ་པོ་ནི་སེམས་ཅན་ཡོན་ཏན་དང་ལྡན་པ་རྣམས་ལ་ནི་

修習大乘　　又諸菩薩卽於如是修正行時　　於具功德諸有情所

लाभसत्कारेण प्रत्युपस्थितो भवति। दोषवत्सु सत्त्वेषु परमेण कारुण्यचित्तेनानु-

མཆོད་པ་དང་། རྙེད་པ་དང་། བཀུར་སྟི་བྱེད་པར་ཉེ་བར་གནས་པ་ཡིན་ནོ། །སེམས་ཅན་སྐྱོན་ཅན་རྣམས་ལ་ནི། མཆོག་ཏུ་སྙིང་རྗེའི་སེམས་དང་།

常樂現前供養恭敬　於具過失諸有情所常樂現前發起

कम्पाचित्तेन प्रत्युपस्थितो भवति। यथाशक्त्या च यथाबलं दोषप्रहाणायैषां प्र-

སྙིང་བརྩེ་བའི་སེམས་ཀྱིས་ཉེ་བར་གནས་པ་ཡིན་ཏེ། ཅི་ནུས་ཅི་སྟོབས་སུ་དེ་དག་གི་སྐྱོན་བསལ་བའི་ཕྱིར་ཡང་སྦྱོར་བར་

最勝悲心慈心　隨能隨力令彼斷除所有過失

युज्यते। अपकारिषु सत्त्वेषु मैत्रचित्ततया प्रत्युपस्थितो भवति। यथाशक्त्या च

བྱེད་དོ། །སེམས་ཅན་གནོད་པ་བྱེད་པ་རྣམས་ལ་བྱམས་པའི་སེམས་ཀྱིས་ཉེ་བར་གནས་པ་ཡིན་ཏེ། གནོད་པ་བྱེད་པ་དེ་དག་གི

於已有怨諸有情所常起慈心　　隨能隨力無

यथाबलमशठो भूत्वा अमायावी तेषां हितसुखमुपसंहरति तेषामपकारिणां

རང་གི་བསམ་པ་དང་། སྐྱོར་བའི་ཚུལ་བསམ་གཡོན་གྱི་སེམས་ལ་ཕྱུར་མ་སྐྱང་བའི་ཕྱིར། གཡོ་དང་སྒྱུ་མེད་པར་ཅི་ནུས

諂無誑作彼種種利益安樂　　令彼怨者意樂

स्वेनाशयप्रयोगदोषेण वैरचित्ततायाः प्रहाणार्थं। उपकारिषु सं[illegible]षु कृतज्ञताया-

ཅི་ལྡོགས་སུ་ཕན་པ་དང་། བདེ་བ་ཉེ་བར་སྒྲུབ་པོ། །སེམས་ཅན་ཕན་འདོགས་པ་རྣམས་ལ་ནི་བྱས་པ་གཟོ་བས་

加行所有過失及怨嫌心自然斷除　於已有恩諸有情所善知恩

स्तुल्याधिकेन प्रत्युपकारेण प्रत्युपस्थितो भवति। आशां च धार्मिकीं परिपूरयत्यस्य

ལན་དུ་ཕན་བཏགས་པ་དེ་དང་མཉམ་པའམ། ལྷག་པར་ཉེ་བར་གནས་པ་ཡིན་ཏེ། དེ་དག་གི་ཆོས་དང་མཐུན་པའི་བསམ་པ་ཡང་ཅི་ནུས་

故若等若增現前酬報　隨能隨力如法令其意望

यथाशक्त्या यथाबलं। अप्रतिबलोऽपि च याचितः सन्तेषु तेषु कृत्यकरणीयेष्वादारं

ཅི་ལྕོགས་སུ་ཡོངས་སུ་ཕྱོགས་པར་སྤྱོད་དོ། །མཐུ་མེད་ནའང་མ་བཅོལ་བར་དོན་དུ་སྒྲུབ་པ་དེ་དང་དེ་དགའ་བ་གུས་པར་རྩོལ་བ་བསྟོན་པར་བྱེད

滿足　　雖無力能彼若求請卽於彼彼所作事業示現殷重

व्यायाममुपदर्शयति न सकृदेव निराकरोति। कथमयंसंज्ञाप्येताशक्तोऽहं नाकर्तु-

དེ། ལན་འགའ་ཞུས་པ་ཙམ་གྱིས་མི་གཏོང་ཞིང་ཅི་ནས་བདག་གིས་མ་ནུས་པ་ཡིན་གྱི། བྱེད་མི་འདོད་པ་ནི་མ་ཡིན་ནོ་སྙམ་དུ་དེས་

精勤營務終不頓止彼所希求　　云何令彼知我無力非無欲

कामम् इति । इत्ययमेवंभागीयो बोधिसत्त्वस्य निष्प्रपञ्चनयारूढस्य परमतत्त्वज्ञा-

ཞེས་པར་བྱེད་དེ་ དེ་ལྟ་བུ་དང་མཐུན་པ་དེ་དག་ནི་བྱང་ཆུབ་སེམས་དཔའ་སྤྲོས་པ་མེད་པའི་ཚུལ་ལ་ཞུགས་ཞིང་དེ་ཁོ་ན་མཆོག

樂　　如是等類當知名為菩薩乘御無戲論理依極真智

नसंनिश्रितस्य सम्यक् प्रयोगो वेदितव्यः ॥

ཤེས་པ་ལ་བརྟེན་པའི་ཡང་དག་པའི་སྦྱོར་བ་ཡིན་པར་རིག་པར་བྱའོ།

修正加行

तत्र कया युक्त्या निरभिलाप्यस्वभावता सर्वधर्माणां प्रत्यवगन्तव्या । येयं स्वल-

དེ་ལ་རིགས་པ་གང་གིས་ཆོས་ཐམས་ཅད་བརྗོད་དུ་མེད་པའི་ངོ་བོ་ཉིད་ཡིན་པར་རིག་པར་རྗེས་སུ་ཁོང་དུ་ཆུད་པར་བྱ་ཞེ་ན། ཆོས་རྣམས་ཀྱི་རང་གི

以何道理應知諸法離言自性　　　　謂一切

क्षणप्रज्ञप्तिर्धर्माणां यदुत रूपमिति वा वेदनेति वा पूर्ववदन्ततो यावन्निर्वाण-

མཚན་ཉིད་དུ་འདོགས་པ་འདི་ལྟ་སྟེ། གཟུགས་ཞེས་བྱ་བའམ། ཚོར་བ་ཞེས་བྱ་བ་ནས། སྔ་མ་བཞིན་དུ་ཐ་ན་མྱ་ངན་ལས་འདས་པ་ཞེས་བྱ་བའི་བར

法假立自相　或說為色　或說為受　如前廣說乃至涅槃

藏本原作 ཚོར་བ་ཞེས་བྱ་བའམ། འདུ་ཤེས་ཞེས་བྱ་བའམ། འདུ་བྱེད་རྣམས་ཞེས་བྱ་བའམ། རྣམ་པར་ཤེས་པ་ཞེས་བྱ་བ་ནས། 此中"或說為想，或說為行，或說為識"三語梵漢均無之
今藏本中[illegible]

(1) वागोचरो वा MS ངག་གི་སྤྱོད་ཡུལ་དང་ངག་གི (2) तथा MS ཇི་ལྟར

मिति वा। प्रज्ञप्तिमात्रमेव तद्वेदितव्यं। न स्वभावो नापि च तद्विनिर्मुक्तास्तद-

གང་ཡིན་པ་དེ་ནི་བཏགས་པ་ཙམ་དུ་ཟད་པར་རིག་པར་བྱ་སྟེ། ངོ་བོ་ཉིད་ཀྱང་མ་ཡིན་ལ། དེ་ལས་མ་གཏོགས་པ་དང་དེ་ལས་གཞན་

當知一切唯假建立 非有自性亦非離彼別有自性是

न्यो (1) वाग्गोचरो वाग्विषयः। एवं सति न स्वभावो धर्माणां तथा विद्यते। यथा (2)

ཡང་ངག་གི་སྤྱོད་ཡུལ་དང་ངག་གི་ཡུལ་མེད་དོ། དེ་ལྟར་ན་ཆོས་རྣམས་ཀྱི་ངོ་བོ་ཉིད་ནི་ཇི་ལྟར་བརྗོད་པ་དེ་བཞིན་དུ་ དཔར་མི་

言所行是言境界 如是諸法非有自性如言所說

भिलप्यंते। न च पुनः सर्वेण सर्वं न विद्यते। स पुनरेवमविद्यमानो न च स-

འགྱུར་ལ། ཐམས་ཅད་ཀྱི་ཐམས་ཅད་དུ་མེད་པ་ཡང་མ་ཡིན་ནོ། །དེ་དེ་ལྟར་ཡོད་པ་ཡང་མ་ཡིན་ལ། ཐམས་ཅད་ཀྱི་

亦非一切都無所有　　如是非有亦非一切都無

र्वेण सर्वमविद्यमानः। कथं विद्यते। असद्भूतसमारोपासङ्ग्राह(1)विवर्जितो(2) भूताः

ཐམས་ཅད་དུ་མེད་པ་ཡང་མ་ཡིན་ན། ཇི་ལྟར་ཡོད་ཅེ་ན། རང་གི་མཚན་ཉིད་ཀྱིས་ཡོད་པ་མ་ཡིན་པ་ལ་སྒྲོ་བཏགས་པ་ལེགས་པར་མ་ཞེན་པ

所有　　云何而有　謂離增益實無妄執及離損減實有

(1) संग्राह MS. ལེགས་པར་མི་ཞེན་པ　　(2) °तस्य MS.

(1) संग्राह ms. ཞེན་པ་པར་མི་ཟེན་པ

पवादासङ्ग्रा(1)हविवर्जितश्च विद्यते। स पुनः पारमार्थिकः स्वभावः सर्वधर्माणां

སྤྲོས་པ་དང་། ཡང་དག་པ་ལ་སྐུར་པ་བཏབ་པ་ལ་ཞེན་པ་ལས་མི་ཟེན་པ་སྤངས་པ་ཡོད་དོ། ཆོས་ཐམས་ཅད་ཀྱི་དོན་དམ་པའི་ངོ་བོ་ཉིད་དེ་ཡང་རྣམ་པར

妄執如是而有　　即是諸法勝義自性當知唯是無

निर्विकल्पस्यैव ज्ञानस्य गोचरो वेदितव्यः। सचेत्पुनर्यथैवाभिलापो येषु धर्मेषु

མི་རྟོག་པའི་ཡེ་ཤེས་ཁོ་ནའི་སྤྱོད་ཡུལ་ཡིན་པར་རིག་པར་བྱའོ། ། གལ་ཏེ་ཆོས་གང་དག་དང་། དངོས་པོ་གང་ལ་ཇི་ལྟར་

分別智所行境界　　若於諸法諸事隨起言說

यस्मिन्वस्तुनि प्रवर्तते। तदात्मकास्ते धर्मास्तद्वस्तु स्यात्। एवं[1] सति बहुविधा

མཛོད་པ་འཇུག་པ་བཞིན་དུ་ཆོས་དེ་དག་རང་དངོས་པོ་དེ་དེའི་བདག་ཉིད་དུ་འགྱུར་ན་དེ། དེ་ལྟར་ན་ཆོས་གཅིག་པུ་དང་།

即於彼法彼事有自性者　如是一法一事

बह्वः स्वभावा एकस्य धर्मस्यैकस्य वस्तुनो भवेयुः। तत्कस्य हेतोः। तथा ह्येक-

དངོས་པོ་གཅིག་པུའི་ངོ་བོ་ཉིད་རྣམ་པ་སྣ་ཚོགས་པ་མང་པོ་དག་ཏུ་འགྱུར་བར་རིགས་སོ། །ཅིའི་ཕྱིར་ཞེ་ན། འདི་ལྟར་ཆོས

應有衆多自性　何以故　以於一法

(1) एव MS. དེ་ལྟར་

स्मिन्[1] धर्म एकस्मिन्[1] वस्तुनि बहुविधा बह्वो बहुभिरभिलापैः प्रज्ञप्तय उपचा-

གཅིག་པུ་དང་། དངོས་པོ་གཅིག་པུ་ལ་མང་པོ་དག་གིས་རྣམ་པ་སྣ་ཚོགས་མང་པོར་བརྗོད་ཅིང་འདོགས་ཏེ་ཉེ་བར་འདོགས"

一事制立衆多假說而詮表故

राः क्रियन्ते। न च बहुविधानां बहूनां प्रज्ञप्तिवादानां[2] नियमः कश्चिदुपलभ्य-

བར་བྱེད་ལ། འདོགས་པའི་ཚིག་རྣམ་པ་སྣ་ཚོགས་མང་པོ་དག་ལས་འདོགས་པའི་ཚིག་གང་ཡང་རུང་བ་གཅིག་ཅེས

亦非衆多假說詮表決定可得

(1) Om. MS. ཚིག་(གཅིག་པུ་དང་། དངོས་པོ་)གཅིག་པུ་ལ (2) प्ति MS. འདོགས་པའི་ཚིག

ते। यदन्यतमेन प्रज्ञप्तिवादेनैकेन तस्य धर्मस्य तस्य वस्तुनः तादात्म्यं तन्म-

ཆོས་དེ་དང་དངོས་པོ་དེ་ལ་དེའི་བདག་ཉིད་དང་དེའི་རང་བཞིན་གྱི་ངོ་བོ་ཉིད་དུ་འགྱུར་ལ། འདོགས་པའི་ཚིག་ལྷག་མ་

謂隨一假說於彼法彼事有體有分有其自性非餘假說

यता तत्स्वभावता स्यान्नान्यैरवशिष्टैः प्रज्ञप्तिवादैः। तस्मात्सकलविकलैः सर्वप्र

གཞན་དག་ནི་མ་ཡིན་ཞེས་བྱ་བའི་ངེས་པ་ཅི་ཡང་མི་དམིགས་ཏེ། དེ་བས་ན་འདོགས་པའི་ཚིག་ཐམས་ཅད་

是故一切假說若真

ज्ञप्तिवादैः सर्वधर्माणां सर्ववस्तूनां नास्ति तादात्म्यं नास्ति तन्मयता नास्ति

ཉེ་མཐའ་དག་གསུམ། །ལ་ཅིག་ཀྱང་རང་སྐྱེ། ཆོས་ཐམས་ཅད་དང་དངོས་པོ་ཐམས་ཅད་ཀྱི་དེའི་བདག་ཉིད་དུ་འགྱུར་བ་ཡང་མེད་ལ། དེའི་རང་བཞིན་གྱི་ངོ་བོ་

不具於一切法於一切事皆非有體有分有其自性

तत्स्वभावता। अपि च सचेद्रूपादयो धर्मा यथापूर्वनिर्दिष्टाः प्रज्ञप्तिवादस्वभावा

ཉིད་དུ་འགྱུར་བ་ཡང་མེད་དོ། །གཞན་ཡང་གལ་ཏེ་གཟུགས་ལ་སོགས་པའི་ཆོས་སྔར་ཇི་སྐད་བསྟན་པ་རྣམས་འདོགས་པའི་ཚིག་གི་ངོ་བོ་ཉིད་ཡིན་

又如前說色等諸法若隨假說有自性者

भवेयुः। एवं सति पूर्वं तावद्वस्तु पश्चात्तत्र च्छन्दतः प्रज्ञप्तिवादोपचारः। प्राक्

དུ་ཟིན་ན། དེ་ལྟ་ན་ཇི་དངོས་པོ་སྔར་བྱུང་ལ། ཕྱིས་དེ་ལ་དགའ་མགུར་འདོགས་པའི་ཚིག་ཏེ་བར་འདོགས་ན་ནི། འདོགས་པའི

要先有事然後隨欲制立假說 先未

प्रज्ञप्तिवादोपचारादकृते[1] प्रज्ञप्तिवादोपचारे स[2] धर्मस्तद्वस्तु निःस्वभाव एव स्यात्।

ཚིག་གིས་ཉེ་བར་འདོགས་པའི་སྔ་རོལ་འདོགས་པའི་ཚིག་གིས་ཉེ་བར་མ་བཏགས་པའི་ཚེ། ཆོས་དེ་དང་དངོས་པོ་དེ་ངོ་བོ་ཉིད་མེད་པ་ཁོ་ནར་འགྱུར་རོ།

制立彼假說時彼法彼事應無自性

(1) °पचाराकृते MS. འདོགས་པའི་ཚིག་གིས་ཉེ་བར་འདོགས་པའི་སྔ་རོལ་... (2) सद् MS, དེ

सति निःस्वभावत्वे निर्वस्तुकः प्रज्ञप्तिवादो न युज्यते । प्रज्ञप्तिवादोपचारे चासति

།ངོ་བོ་ཉིད་མེད་པར་གྱུར་ན་ཡང་དངོས་པོ་མེད་པ་ལ་ནི་འདོགས་པའི་ཚིག་གིས་ཉེ་བར་གདགས་སུ་མི་རུང་ངོ་། འདོགས་པའི་ཚིག་གིས་ཉེ་བར་འདོགས་པ་མེད་ན

若無自性無事制立假說詮表不應道理　假說詮表既無所有

प्रज्ञप्तिवादस्वभावता धर्मस्य वस्तुनो न युज्येत। सचेत्पुनः पूर्वमेव प्रज्ञप्तिवादो-

ཡང་། ཆོས་དང་དངོས་པོར་འདོགས་པའི་ཚིག་གིས་ངོ་བོ་ཉིད་དུ་ཡོད་པར་མི་རུང་ངོ་། །གལ་ཏེ་འདོགས་པའི་ཚིག་ཉེ་བར་འདོགས་པའི་སྔ་རོལ་

彼法彼事隨其假說而有自性不應道理　又若諸色未立假說詮表

पचाराद(1)कृते प्रज्ञप्तिवादोपचारे स धर्मः तद्वस्तु तदात्मकं स्यात्(1)। एवं सति वि-

ནས། (1) གཟུགས་ཞེས་དེ་གཟུགས་ཀྱི་བདག་ཉིད་ཡིན་ཏེ། ཕྱིས་ཀྱང་གཟུགས་ཀྱི་བདག་ཉིད་ལ་བརྟགས་པའི་ཚིག་གིས་བརྟགས་པའི་གཟུགས་སུ་རྟོགས་པར་འགྱུར་ན་ཡོད། (1) དེ་ལྟ

以前先有色性後依色性制立假說攝取色者　　　是則離色

ना तेन रूपमिति प्रज्ञप्तिवादोपचारेण रूपसंज्ञके धर्मे रूपसंज्ञके वस्तुनि रूप-

ན་ནི་གཟུགས་ཞེས་འདོགས་པའི་ཚིག་གི་ཉེ་བར་འདོགས་པ་དེ་མེད་བཞིན་དུ་ཡང་གཟུགས་ཞེས་བྱ་བར་འགྱུར་བའི་ཆོས་དང་། གཟུགས་ཞེས་བྱ་བར་འགྱུར་བའི་དངོས་པོ་དེ་ལ

假說詮表於色想法於色想事應起色覺

(1). So MS. See Tibetan version (1)—(1)

बुद्धिः प्रवर्तेत। न च प्रवर्तते। तदनेन कारणेनानया युक्त्या निरभिलाप्यः

གཟུགས་ཀྱི་བློ་འཇུག་པར་འགྱུར་བའི་རིགས་ན་མི་འཇུག་སྟེ། དེ་བས་ན་གཏན་ཚིགས་འདི་དང་། རིགས་པ་འདིས་ཆོས་ཐམས་ཅད་བརྗོད་

而實不起 由此因緣由此道理當知諸法離言

स्वभावः सर्वधर्माणां प्रत्यवगन्तव्यः। यथा रूपमेवं वेदनादयो यथा निर्दिष्टा

དུ་མེད་པའི་ངོ་བོ་ཉིད་དུ་ཁོང་དུ་ཆུད་པར་བྱའོ། །གཟུགས་ལ་ཇི་ལྟ་བ་བཞིན་དུ་ཚོར་བ་ལ་སོགས་པ་ནས། ཐ་ན་སྣང་ན་ལས

自性 如說其色如是受等如前所說

धर्मा अन्ततो यावन्निर्वाणपर्यन्ता वेदितव्याः ॥

འདས་པའི་བར་དུ་ཇི་སྐད་བཤད་པའི་ཆོས་རྣམས་ལ་ཡང་དེ་བཞིན་དུ་རིག་པར་བྱའོ།

乃至涅槃應知亦爾

द्वावि[1]मावस्माद्धर्मविनयात्प्रणष्टौ वेदितव्यौ । यश्च रूपादीनां धर्माणां रूपा-

།གཟུགས་ལ་སོགས་པའི་ཆོས་རྣམས་ལ་གཟུགས་ལ་སོགས་པའི་དངོས་པོ་ལ་འདོགས་པའི་ཚིག་གི་ངོ་བོ་ཉིད་ཀྱི་རང་གི་མཚན་ཉིད་ཡོད་པ

有二種人於佛所說法毗奈耶俱為失壞一者於色等法於色

(1) 參照梵藏本作

ढिकस्य वस्तुनः प्रज्ञप्तिवादस्वभाव स्वलक्षणामसद्भूतसमारोपतोऽभिनिविशते।

མ་ཡིན་པ་ལ་སྒྲོ་བཏགས་ནས་མངོན་པར་ཞེན་པ་གང་ཡིན་པ་དང་། འདོགས་པ་པའི་ཚིག་གི་མཚན་མའི་གཞི་འདོགས་པའི་ཚིག་གི་མཚན་

等事謂有假說自性自相於實無事起增益執

यश्चापि प्रज्ञप्तिवादनिमित्ताधिष्ठानं प्रज्ञप्तिवादनिमित्तसंनिश्रयं निरभिलाप्या-

མའི་རྟེན་དུ་གྱུར་པ། བརྗོད་དུ་མེད་པའི་བདག་ཉིད་ཀྱིས་དོན་དམ་པར་ཡོད་པ་ཡང་དག་པ་འི་དེ་དངོས་པོ་ལ་ཐམས་ཅད་ཀྱི་ཐམས་ཅད་དུ་མེད་དོ་

二者於假說相處於假說相依離言自性勝義法性謂一切種皆無

त्मकतया परमार्थसद्भूतं वस्त्वपवदमानो नाशयति सर्वेण सर्वं नास्तीति।

ཞེས་སྨྲ་བ་འདི་ནི་ཞིང་ཆུད་གཟན་ནས་པར་སྐྱེད་པ་གང་ཡིན་པ་འདི་གཉིས་ནི་ཆོས་འདུལ་བ་འདི་ལས་རབ་ཏུ་ཉམས་པ་ཡིན་པར་རིག་པར་བྱའོ།

所有於實有事起損減執

असद्भूतसमारोपे तावद्ये दोषाः ते पूर्वमेव निरूपिताः उत्ताना विशदिताः

།ཡོད་པ་མ་ཡིན་པ་ལ་སྒྲོ་འདོགས་པའི་ཉེས་པ་གང་ཡིན་པ་དེ་དག་ནི་སྔོན་ཉིད་དུ་དཔྱད་ཅིང་རབ་ཏུ་གསལ་བར་བྱས་སོ། ཕ་གྱིལ་

於實無事起增益執妄立法者所有過失已具如前顯了開示

प्रकाशिताः। यैः दोषैः रूपादिके वस्तुन्यसद्भूतसमारोपात्प्रणष्टो भवत्य-

ཞིང་བསྙན་ཟེན་ཏོ་ ཉེས་པ་དེ་དག་གིས་གཟུགས་ལ་སོགས་པའི་དངོས་པོ་ཡོད་པ་མ་ཡིན་པ་ལ་སྒྲོ་བཏགས་པས་ཆོས་འདུལ་བ

於色等法實無事中起增益執有過失故於佛所說法

स्माद्धर्मविनयादिति वेदितव्यः। यथा पुना रूपादिकेषु धर्मेषु वस्तुमात्रम-

འདི་ལས་རབ་ཏུ་ཉམས་པ་ཡིན་པར་རིག་པར་བྱའོ། །གཟུགས་ལ་སོགས་པའི་ཆོས་རྣམས་ཀྱི་དངོས་པོ་ཙམ་ལ་ཡང་སྐུར་བ་

毗奈耶甚為失壞。 於色等法實有唯事起損減執壞諸法

प्यपवदमानः सर्ववैनाशिकः प्रणष्टो भवत्यस्माद्धर्मविनयात् । तथा वक्ष्यामि

འདེབས་ཤིང་། ཐམས་ཅད་ཆུད་གཟོན་པ་དེ་དག་ཆོས་འདུལ་བ་འདི་ལས། ཧ་ཅང་རབ་ཏུ་ཉམས་པར་འགྱུར་བ་ དེ་ལྟར་བཤད་པར་བྱ་སྟེ།

者所有過失由是過失於佛所説法毘柰耶甚為失壞我今當說謂

रूपादीना धर्माणा वस्तुमात्रमपवदमानस्य नैव तत्त्व नापि प्रज्ञप्तिस्तदुभय-

གཟུགས་ལ་སོགས་པའི་ཆོས་རྣམས་ཀྱི་དངོས་པོ་ཙམ་ལ་སྐུར་བ་འདེབས་པ་ལ་ནི་དེ་ཁོ་ན་ཡང་མེད་པ་ལ་འདོགས་པ་ཡང་མེད་དེ།

若於彼色等諸法實有唯事起損減執即無真實亦無虛假如是二種

(i) om. c.

मेतन्न युज्यते। तद्यथा सत्सु रूपादिषु स्कन्धेषु पुद्गलप्रज्ञप्तिर्युज्यते। नासत्सु।

དེ་གཅིག་ཡང་མི་རིགས་སོ།། འདི་ལྟ་སྟེ་དཔེར་ན། གཟུགས་ལ་སོགས་པའི་ཕུང་པོ་རྣམས་ཡོད་ན། གང་ཟག་གདགས་སུ་རུང་གི་མེད་དུ་ཟིན་ན་ནི

皆不應理　譬如要有色等諸蘊方有假立補特伽羅非無實事而

निर्वस्तुका पुद्गलप्रज्ञप्तिः। एवं रति रूपादीनां धर्माणां वस्तुमात्रे स रूपादि-

ན་དངོས་པོ་མེད་པ་ལ་གང་ཟག་གདགས་སུ་མེད་དོ།། དེ་བཞིན་དུ་གཟུགས་ལ་སོགས་པའི་ཆོས་རྣམས་ཀྱི་དངོས་པོ་ཙམ་ཡོད་ན། གཟུགས་ལ'''

有假立補特伽羅　如是要有色等諸法實有唯事方可得有色等

धर्मप्रज्ञप्तिवादोपचारो युज्यते। नासति। निर्वस्तुकः प्रज्ञप्तिवादोपचारः।

སོགས་པའི་ཆོས་འདོགས་པའི་ཚིག་ཉེ་བར་གདགས་སུ་རུང་ངོ། །མེད་དུ་ཟིན་ན་དངོས་པོ་མེད་པ་ལ་གདགས་པའི་ཚིག་གིས་ཉེ་བར་འདོགས་པ་མེད་དོ།

諸法假說所表非無唯事而有色等假說所表

तत्र प्रज्ञप्तेर्वस्तु नास्तीति निरधिष्ठाना प्रज्ञप्तिरपि नास्ति। अतो य एक-

དེ་ལ་འདོགས་པའི་གཞི་མེད་དུ་ཟིན་ན་ནི། གཞི་མེད་པར་གྱུར་ནས་འདོགས་པ་འང་མེད་པར་འགྱུར་རོ། །དེ་བས་ན་གང་དག་ཁ་

若唯有假無有實事既無依處假亦無有是則名為壞諸法者如有一

त्या दुर्विज्ञेयान्सूत्रान्तान्महायानप्रतिसंयुक्तां गंभीरांञ्छून्यताप्रतिसंयुक्ता-

ཚིག་ཤེས་པར་དཀའ་བའི་མདོ་སྡེ་ཐེག་པ་ཆེན་པོ་དང་ལྡན་པ་ཟབ་མོ་སྟོང་པ་ཉིད་དང་ལྡན་པ།

類開說難解大乘相應空性相應未極顯了密意趣義甚深經

नाभिप्रायिकार्थनिरूपिताञ्छ्रुत्वा यथाभूतं भाषितस्यार्थमनभिज्ञायायोनिशो

དགོངས་པའི་དོན་བསྟན་པ་དག་ཐོས་ན་བཤད་པའི་དོན་ཡང་དག་པ་ཇི་ལྟ་བ་བཞིན་དུ་མ་ཤེས་ན། ཚུལ་བཞིན་མ་ཡིན་པ་རྣམ་པར

典不能如實解所說義起不如理虛妄分別由不巧便所引尋

विकल्पायोगविहितेन तर्कमात्रकेणैवं दृष्टयो भवन्त्येवं वादिनः। प्रज्ञप्तिमात्र

པར་བརྟགས་ཏེ། རིགས་པ་མ་ཡིན་པ་ལས་བསྐྱེད་པའི་རྟོག་གེ་ཙམ་གྱིས་འདི་ཐམས་ཅད་ནི་བཏགས་པ་ཙམ་དུ་ཟད་དེ། འདི་ནི་དེ་

思起如是見立如是論 一切唯

मेव सर्वमेतत्तत्त्वं। यश्चैवं पश्यति स सम्यक् पश्यतीति। तेषा प्रज्ञप्त्यधिष्ठानस्य

ཁོ་ན་ཡིན་ནོ། སུ་འདི་ལྟར་ལྟ་བ་དེ་ནི་ཡང་དག་པར་ལྟ་བ་ཡིན་ནོ་ཞེས་དེ་ལྟར་ལྟ་ཞིང་དེ་སྐད་སྨྲའོ། །དེ་དག་གི་ལྟར་ན་འདོགས་པའི་གཞིའི

假是為真實 若作是觀名為正觀 彼於虛假所依處

वस्तुमात्रस्याभावात्सैव प्रज्ञप्तिः सर्वेण सर्वं न भवति। कुतः पुनः प्रज्ञप्तिमात्रं तत्त्वं

དངོས་པོ་ཙམ་ཡང་མེད་པས། འདོགས་པ་དེ་ཉིད་ཀྱང་ཐམས་ཅད་ཀྱི་ཐམས་ཅད་དུ་མེད་པར་འགྱུར་ན། བཏགས་པ་ཙམ་གྱི་དེ་ཁོ་ན་ཉིད་ཡོད་པར

所實有唯事撥為非有是則一切虛假皆無 何當得有一切唯假是

भविष्यति। तदनेन पर्यायेण तैस्तत्त्वमपि प्रज्ञप्तिरपि तदुभयमप्यपवादितं भवति।

ག་ལ་འགྱུར་ཏེ། དེ་བས་ན་རྣམ་གྲངས་དེས་ན་དེ་དག་གིས་ནི་དེ་ཁོ་ན་དང་བཏགས་པ་དེ་གཉིས་ལ་ཡང་སྐུར་པ་བཏབ་པར་འགྱུར་ཏེ།

為真實 由此道理彼於真實及以虛假二種俱謗都無所有

प्रज्ञप्तितत्त्वापवादाच्च प्रधानो नास्तिको वेदितव्यः। स एवं नास्तिकः सन्नकथ्यो[1]

བཏགས་པ་དང་། དེ་ཁོ་ན་ལ་སྐུར་བ་བཏབ་པས་ན། མེད་པར་ལྟ་བའི་གཙོ་བོ་ཡིན་པར་རིག་པར་བྱའོ།། དེ་ལྟར་མེད་པར་ལྟ་བ་དེ་ནི་ཚངས་པ་མཚུངས་པར་སྤྱོད་པ

由謗真實及虛假故當知是名最極無者　如是無者一切有智同

भवत्यसंवास्यो विज्ञानां सब्रह्मचारिणां। स[2] आत्मानमपि विसपादयति[3]। लोको

མཛངས་པ་རྣམས་ཀྱིས་སྨྲ་སྨྲོས་པའི་ཁོམས་མ་ཡིན་པ་དང་། འགྲོགས་པར་མི་བྱ་བ་ཡིན་ཏེ། དེ་ནི་བདག་ཉིད་ཀྱང་ཕུང་བར་བྱེད་ལ། འཇིག

梵行者不應共語不應共住　如是無者能自敗壞　亦壞

(1). अकथ्यो K.  अकान्थ्यो C. སྨྲ་བའི་ཁོམ་མ་ཡིན་པ  (2) om. C.  (3) विपादयति K.

ऽपि योऽस्य दृष्ट्यनुमतिं आपाद्यते। इदं च संधायोक्तं भगवता। वरमिहैकत्यस्य

རྗེན་གང་དེའི་ལྟ་བ་ལ་ཞུགས་པ་ཡང་སྣང་བར་བྱེད་དོ།། བཅོམ་ལྡན་འདས་ཀྱིས་འདི་ལ་དགོངས་ནས། འདི་ན་ལ་ལ་གང་ཟག་ཏུ་ལྟ་བ་ནི་

世間隨彼見者　　世尊依彼密意說言 寧如一類起

पुद्गल दृष्टिर्न त्वेवैकत्यस्य दुर्गृहीता शून्यतेति। तत्कस्य हेतोः। पुद्गलदृष्टिको

བླའི། ལ་ལ་སྟོང་པ་ཉིད་ལ་ལོག་པར་ཞེན་པ་ནི་དེ་ལྟ་མ་ཡིན་ནོ་ཞེས་བཀའ་སྩལ་ཏེ། དེ་ཅིའི་ཕྱིར་ཞེ་ན། གང་ཟག་ཏུ་ལྟ་བ་ཅན་གྱི་སྐྱེ་བོ་ནི་

我見者不如一類惡取空者　　何以故　　起我見者

जन्तुर्ज्ञेये केवलं मुह्यन्न तु सर्वं ज्ञेयमपवदेत । न ततो निदानमपायेषूपपद्येत ।

ཤེས་བྱ་ལ་རྨོངས་པ་འབའ་ཞིག་ཏུ་ཟད་དོ། །ཤེས་བྱ་ཐམས་ཅད་ལ་སྐུར་བ་འདེབས་པ་མ་ཡིན་ཏེ། གཞི་དེས་སེམས་ཅན་དམྱལ་བ་རྣམས་སུ་སྐྱེ་བར་མི་འགྱུར་ལ།

唯於所知境界迷惑 不謗一切所知境界 不由此因墮諸惡趣

नापि धर्मार्थिकं दुःखविमोक्षार्थिनं पर विसंवादयेन्न विप्रलम्भयेत् । धर्मे सत्ये

གཞན་ཆོས་འདོད་པ་དང་། སྡུག་བསྔལ་ལས་རྣམ་པར་ཐར་པར་འདོད་པ་དག་ཀྱང་སླུ་བར་མི་བྱེད་ཅིང་བསླུ་བར་མི་བྱེད་ལ། ཆོས་དང་བདེན་པ

於他求法求苦解脫不為虛誑不作稽留 於法於諦

च प्रतिष्ठापयेत्। न च शैथिलिको भवेच्छिक्षापदेषु। दुर्गृहीतया पुनः शून्यतया

ལ་ཡང་འགོད་པར་བྱེད་དོ། །བསླབ་པའི་གཞི་དག་ལ་ཡང་གཡེལ་བར་མི་འགྱུར་རོ། །སྟོང་པ་ཉིད་ལ་ལོག་པར་ཟིན་པ་ནི་ཤེས་

亦能建立　於諸學處不生慢緩　惡取空者亦於所知

ज्ञेये वस्तुनि मुह्येत्। अप्यपवदेत ज्ञेयं सर्व। तन्निदान चापायेषूपपद्यते। धार्मिकं

བྱའི་དངོས་པོ་ལ་ཡང་རྨོངས་ལ། ཤེས་བྱ་ཐམས་ཅད་ལ་སྐུར་བ་འདེབས་ཏེ། གཞི་དེས་སེམས་ཅན་དམྱལ་བ་རྣམས་སུ་ཡང་སྐྱེ་བར་འགྱུར་ལ། གཞན་ཆོས་

境界迷惑　亦謗一切所知境界　由此因故墮諸惡趣　於他

च दुःखविमोक्षार्थिकं परं विपातयेत्। सैथिलिकश्च स्यच्छिक्षापदेषु। एवं भूतं

འདོད་པ་དང་། སྡུག་བསྔལ་ལས་རྣམ་པར་ཐར་བར་འདོད་པ་རྣམས་ཀྱང་ཕྱུང་བར་བྱེད་དོ།། བསླབ་པའི་གཞི་དག་ལ་ཡང་བཤོལ་བར་འགྱུར་ཏེ། དེ་ལྟར་ཡང་དག་པ

求法求苦解脫能為害誤亦作稽留於法於諦不能建立於諸學處極生

वस्तु अपवदमानः प्रणष्टो भवत्यस्माद्धर्मविनयात् ॥

ཇི་ལྟ་བ་བཞིན་གྱི་དངོས་པོ་ལ་སྐུར་པ་འདེབས་པ་དེ་ཆོས་འདུལ་བ་འདི་ལས་རབ་ཏུ་ཉམས་པ་ཡིན་ནོ།

慢緩如是損滅實有事者於佛所說法毗奈耶甚為失壞

कथ पुनर्दुर्गृहीता भवति शून्यता । यः कश्चिच्छ्रमणो वा ब्राह्मणो वा तच्च नेच्छति

།ཇི་ལྟར་ན་སྟོང་པ་ཉིད་ལ་ལོག་པར་འཛིན་པ་ཡིན་ཞེ་ན། དགེ་སྦྱོང་ངམ། བྲམ་ཟེ་གང་ལ་ལ་གང་གིས་སྟོང་པ་དེ་ཡང་མི་

云何名為惡取空者　　謂有沙門或婆羅門由彼故空亦不

येन शून्यं । तदपि नेच्छति यत्शून्यं । इयमेवंरूपा दुर्गृहीता शून्यतेत्युच्यते ।

འདོད་ལ་གང་གིས་གང་སྟོང་པ་དེ་ཡང་མི་འདོད་པ་འདི་ལྟ་བུ་འདི་ནི་སྟོང་པ་ཉིད་ལ་ལོག་པར་ཟིན་པ་ཞེས་བྱའོ།

信受於此而空亦不信受　　如是名為惡取空者

तत्कस्य हेतोः। येन हि शून्यं। तदसद्भावात्। यच्च शून्यं। तत्सद्भावाच्छून्यता

།དེ་ཅིའི་ཕྱིར་ཞེ་ན། གང་གིས་སྟོང་པ་ དེ་མེད་པ་དང་། གང་སྟོང་པ་ དེ་ཡོད་པའི་སྟོང་པ་ཉིད་ནི་རིགས་

何以故 由彼故空 彼實是無 於此而空此實是有由此道理可

युज्येत। सर्वाभावाच्च कुत्र किं केन शून्यं भविष्यति। न च तेन तस्यैव शून्यता

པའི་ཕྱིར་རོ། །ཐམས་ཅད་མེད་ན་ནི་གང་དུ་ཅི་ཞིག་གང་གིས་སྟོང་པར་འགྱུར་ཏེ། དེས་ན་དེ་ཉིད་སྟོང་པ་ཉིད་དུ་འགྱུར་དུ་

說為空 若說一切都無所有何處何者何故名空 亦不應言由此於此即說

युज्यते । तस्मादेवं दुर्गृहीता शून्यता भवति ॥

ནི་མི་རུང་ངོ། །དེ་བས་ན་དེ་ལྟ་བུ་ནི་སྟོང་པ་ཉིད་ལ་ལོག་པར་ཟིན་པ་ཡིན་ནོ།

為空　是故名為惡取空者

कथं च पुनः सुगृहीता शून्यता भवति । यतश्च यद्यत्र न भवति । तत्तेन शून्य-

།ཇི་ལྟར་ན་སྟོང་པ་ཉིད་ལ་ལེགས་པར་ཟིན་པ་ཡིན་ཞེ་ན། གང་གི་ཕྱིར་གང་ལ་གང་མེད་པ་ དེ་ནི་དེས་སྟོང་པར་

云何復名善取空者　　謂由於此彼無所有　即由彼故

मिति समनुपश्यति। यत्पुनरत्रावशिष्टं भवति। तत्सदिहास्तीति यथाभूतं

ཡང་དག་པར་མཐོང་ངོ། འདི་ལ་ལྷག་མ་གང་ཡིན་པ་དེ་ནི་འདི་ནི་ཡང་དག་པར་ཡོད་དོ་ཞེས་ཡང་དག་པ་ཇི་ལྟ་བ་

正觀為空　　復由於此餘實是有　卽由餘故如實知有

प्रजानाति। इयमुच्यते शून्यतावक्रान्तिर्यथाभूता अविपरीता। तद्यथा रूपा-

བཞིན་དུ་རབ་ཏུ་ཤེས་པ་དེ་ནི་སྟོང་པ་ཉིད་ལ་ཡང་དག་པ་ཇི་ལྟ་བ་བཞིན་དུ་ཕྱིན་ཅི་མ་ལོག་པར་ཞུགས་པ་ཞེས་བྱ་སྟེ། འདི་ལྟ་སྟེ་གཟུགས་ལ་ཞེས་

如是名為悟入空性如實無倒　　謂於如前

(1)……(1) —— (一)……(一) 兩號之間梵本 (2)……(2) 間文，狄氏應加 … तेन रूपादिसंज्ञकेन 藏本譯 གཟུགས་ཞེས་བྱ་བ་ལ་སོགས་པར་འདོགས་པའི་ཚིག་གི་བདག་ཉིད … 本作 रूपमित्येवमादिप्रज्ञप्तिवादात्मना。此處因不敢 … གཟུགས་ཞེས་བྱ་བ་ལ་སོགས་པར … रूपादिसंज्ञक … 故 … 正文。

दिसंज्ञके यथानिर्दिष्टे वस्तुनि रूपमित्येवमादिप्रज्ञप्तिवादात्मको धर्मो नास्ति ।

བྱ་བ་ལ་སོགས་པ་ཇི་སྐད་བསྟན་པའི་དངོས་པོ་རྣམས་ལ་གཟུགས་ཞེས་བྱ་བ་ལ་སོགས་པར་འདོགས་པའི་ཚིག་གི་བདག་ཉིད་ཀྱི་ཆོས་མེད་དོ་

所說一切色等想事所說色等假說性法都無所有

(1)अतस्तद्रूपादिसंज्ञकं वस्तु (2)तेन रूपमित्येवमादि(3)प्रज्ञप्तिवादात्मना शून्यं(1) ।

(一)དེ་ལྟ་བས་ན་གཟུགས་ཞེས་བྱ་བ་ལ་སོགས་པའི་དངོས་པོ་དེ་གཟུགས་ཞེས་བྱ་བ་ལ་སོགས་པར་འདོགས་པའི་ཚིག་གི་བདག་ཉིད་དེས་སྟོང་ངོ་(一)

是故於此色等想事由彼色等假說性法說之為空

किं पुनः तत्र रूपादिसंज्ञके वस्तुन्यवशिष्टं। यदुत तदेव रूपमित्येवमादिप्र-[(1)]

།གཟུགས་ཞེས་བྱ་བ་ལ་སོགས་པའི་དངོས་པོ་དེའི་ལྷག་མ་གང་ཞེ་ན། འདི་ལྟ་སྟེ། གཟུགས་ཞེས་བྱ་བ་ལ་སོགས་པར་འདོགས

於此一切色等想事何者為餘　謂即色等假說所依

ज्ञप्तिवादाश्रयः[(1)]। तच्चोभयं यथाभूतं[(2)] प्रजानाति यदुत वस्तुमात्रं च विद्यमान

པའི་ཚིག་ཙམ་པོ་འདི་ཡིན་ཏེ། དེ་གཉིས་ཡང་འདི་ལྟ་སྟེ། དངོས་པོ་ཙམ་ཡོད་པ་དང་། དངོས་པོ་ཙམ་དུ་འདོགས་པར་ཡང་དག་པ་ཇི་ལྟ

如是二種皆如實知　謂於此中實有唯事

(1)----(1) प्रथमयोराश्रयं प्रज्ञप्तिवादनिमित्तमात्रकं च C.　(2) °तं यः C.

वस्तुमात्रे च प्रज्ञप्तिमात्रं न चासद्भूतं समारोपयति । न भूतमपवदते नाधिकं

པ་བཞིན་དུ་རབ་ཏུ་ཞེས་ཏེ། ཡོད་པ་མ་ཡིན་པ་ལ་ཡང་སྒྲོ་མི་འདོགས་ལ། ཡང་དག་པ་ལ་ཡང་སྐུར་པ་མི་འདེབས་སོ། །ལྷག

於唯事中亦有唯假 不於實無起增益執 不於實有起損減執

करोति न न्यूनीकरोति नोत्क्षिपति न प्रक्षिपति । यथाभूतां च तथतां नि-

པར་ཡང་མི་བྱེད་ལ་ཆུང་ངུར་ཡང་མི་བྱེད་དོ། །འདོར་བར་ཡང་མི་བྱེད་ལ་སྣོན་པར་ཡང་མི་བྱེད་དེ། ཡང་དག་པ་ཇི་ལྟ་བ་དེ་བཞིན་ཉིད་བརྗོད་

不增不減不取不捨 如實了知如實真如

रभिलाप्यस्वभावतां यथाभूतं प्रजानाति। इयमुच्यते सुगृहीता शून्यता

དུ་མེད་པའི་ངོ་བོ་ཉིད་དུ་ཡང་དག་པ་ཇི་ལྟ་བ་བཞིན་དུ་རབ་ཏུ་ཤེས་པ་དེ་ནི་སྟོང་པ་ཉིད་ལེགས་པར་ཟིན་པ་ཞེས་བྱ་སྟེ།

離言自性　　如是名爲善取空者於空法

सम्यक् प्रज्ञया सुप्रतिविद्धेति। इय तावदुपपत्तिसाधनयुक्तिरानुलोमिकी

ཡང་དག་པའི་ཤེས་རབ་ཀྱིས་ཤིན་ཏུ་རྟོགས་པ་ཞེས་བྱའོ། །འདི་ནི་རེ་ཞིག་འཐད་པ་སྒྲུབ་པའི་རིགས་པ་དང་རྗེས་སུ་མཐུན་པ་ཡིན་ཏེ།

性能以正慧妙善通達　　如是隨順證成道理應知諸法離

यया निरभिलाप्यस्वभावता सर्वधर्माणां प्रत्यवगन्तव्या ॥

